CC-O. In Public Domain. Digitized by eGangotri

II

SRI VIDYA BHARATHI
BOOK CENTRE
Bharathi Street,
SRINGERI - 577 139.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अथ द्वितीयः सर्गः

तस्मिन्विप्रकृताः काले तारकेण दिवौकसः ।
तुरासाहं पुरोधाय धाम स्वायम्भुवं ययुः ॥ १ ॥

अन्वयः—तस्मिन् काले तारकेण विप्रकृताः दिवौकसः तुरासाहं पुरोधाय स्वायंभुवं धाम ययुः ।

व्याख्या—तस्मिन्निति । तस्मिन् काले=पार्वती-सेवा-समये । तारकेण-तारकनाम्नाऽसुरेण । विप्रकृताः=अपकृताः । दिवौकसः—द्यौः ओकः येषां ते=सुराः ('दिवं स्वर्गेऽन्तरिक्षे च' इति विश्वः) । तुरासाहं—तुरम्=त्वरितं, साहयति=अभिभवति इति तुरासाट्, तम् = शक्रम् । पुरोधाय = पुरस्कृत्य । स्वायंभुवम्—स्वयम्भुव इदं स्वायम्भुवम्, तत् = ब्रह्मणः ('हिरण्यगर्भो लोकेशः स्वयम्भूश्चतुराननः' इत्यमरः) । धाम=स्थानम् । ययुः=जग्मुः । अनुष्टुब्वृत्तम् । तल्लक्षणं यथा—श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघुपञ्चमम् । द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ।'

सरलार्थः—अथ पार्वत्युत्पत्तिकाले तारकेण तिरस्कृताः देवा देवेशमिन्द्रं पुरस्कृत्य ब्रह्मणो निवासस्थानं जग्मुः ।

हिन्दी—पार्वती जी द्वारा शिवजी की आराधना करते समय तारकासुर द्वारा पीड़ित होकर देवता इन्द्रदेव को आगे कर ब्रह्माजी (से प्रार्थना करने उन) के स्थान (ब्रह्मलोक) को गये ॥ १ ॥

तेषामाविरभूद् ब्रह्मा परिम्लानमुखश्रियाम् ।
सरसां सुप्तपद्मानां प्रातर्दीधितिमानिव ॥ २ ॥

अन्वयः—परिम्लानमुखश्रियां तेषां ब्रह्मा सुप्तपद्मानां सरसां प्रातः दीधितिमान् इव आविरभूत् ।

व्याख्या—तेषामिति । परिम्लानमुखश्रियाम्—मुखस्य श्रीः मुख श्रीः, परिम्लाना मुख श्रीः येषां ते, तेषाम्=क्षीणमुखकान्तीनाम् । तेषाम्=देवानाम् । ब्रह्मा=विधाता ('ब्रह्माऽऽत्मभूः सुरज्येष्ठः परमेष्ठी पितामहः' इत्यमरः) ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सुप्तपद्मानाम् —सुप्तानि=मुकुलितानि, पद्मानि = कमलानि येषां तानि, तेषाम् ('कासारः सरसी सरः'इत्यमरः) । प्रातः=प्रभाते । दीधितिमान् इव—दीधितयः सन्ति अस्य सः दीधितिमान् = भानुः यथा । आविरभूत् = प्रादुरभूत् ('प्रकाशे प्रादुराविः स्यात्' इत्यमरः) । अत्रोपमालङ्कारः ।

सरलार्थः —परिक्षीणमुखकान्तीनां देवानां समक्षं ब्रह्मा मुकुलितकमलानां सरसां प्रभाते सूर्य इव प्रकटितोऽभवत् ।

हिन्दी—(तारकासुर से भयभीत) म्लानमुख उन देवताओं के सामने मुकुलित कमलवाले तालाबों के समक्ष सूर्य भगवान् के समान ब्रह्मा जी प्रकट हुए ॥ २ ॥

अथ सर्वस्य धातारं ते सर्वे सर्वतोमुखम् ।
वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे ॥ ३ ॥

अन्वयः—अथ सर्वे ते सर्वतोन्मुखं वागीशं सर्वस्य धातारं प्रणिपत्य अर्थ्याभिः वाग्भिः उपतस्थिरे ।

व्याख्या—अथेति । अथ=अनन्तरम् । सर्वे ते = ते सर्वे सुराः । सर्वतोन्मुखम्–विश्वतोमुखम् । वागीशम्–वाचामीशो वागीशस्तम्=वाक्पतिम् ('वागीशो वाक्पतिः समौ' इत्यमरः) । सर्वस्य = निखिलस्य । धातारम्=स्रष्टारम् । प्रणिपत्य = प्रणम्य । अर्थ्याभिः=यथार्थभूताभिः । वाग्भिः = वाणीभिः । उपतस्थिरे = उपस्थानं चक्रुः । अनुष्टुब्वृत्तम् ।

सरलार्थः—तदनन्तरं सर्वे देवाः निखिलजगद्रचयितारं चतुराननं प्रणम्य यथार्थभूताभिः वाणीभिस्तुष्टुवुः ।

हिन्दी—ब्रह्मा जी के दर्शन करने के पश्चात् सभी देवता सकललोकनिर्माता चतुरानन को प्रणाम कर उनकी यथार्थ वाणी द्वारा स्तुति करने लगे ॥ ३ ॥

नमस्त्रिमूर्तये तुभ्यं प्राक्सृष्टेः केवलात्मने ।
गुणत्रयविभागाय पश्चाद् भेदमुपेयुषे ॥ ४ ॥

अन्वयः— भगवन् !) सृष्टेः प्राक् केवलात्मने, पश्चात् गुणत्रयविभागाय भेदम् उपेयुषे (अतएव) त्रिमूर्तये तुभ्यं नमः ।

व्याख्या—नम इति । (भगवन् !) सृष्टेः = लोकोत्पत्तेः । प्राक्=पूर्वम् । केवलात्मने—केवलः आत्मा यस्य सः, तस्मै = एकरूपाय । पश्चात्=सृष्ट्य-

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

न्तरम् । गुणत्रयविभागाय-गुणानां त्रयं गुणत्रयम्, तदेव विभागो यस्य सः, तस्मै = सत्वरजस्तमोगुणविभागाय । भेदम् = उपाधिम् । उपेयुषे=प्राप्तवते (अतएव) त्रिमूर्तये = तिस्रः मूर्त्तयः यस्य सः, तस्मै=ब्रह्मविष्णुरुद्ररूपाय । तुभ्यम्=ते, धात्रे । नमः=प्रणामोऽस्तीति । अनुष्टुब्वृत्तम् ।

सरलार्थः—हे प्रभो ! सृष्टेः पूर्वमेकरूपाय, तदनन्तरं सत्वरजस्तमोगुण-भेदमधिष्ठाय ब्रह्मविष्णुरुद्ररूपिणे त्रिमूर्त्तये ते नमः ।

हिन्दी—(भगवन् !) सृष्टि के पूर्व एक रूप तथा सृष्टि के समय सत्व-रज-तम का विभाग करने के लिए भेद रूप को प्राप्त ब्रह्मा-विष्णु-महेश रूपी त्रिमूर्ति (आप) के लिए प्रणाम है ॥ ४ ॥

यदमोघमपामन्तरुप्तं बीजमज ! त्वया ।
अतश्चाचरं विश्वं प्रभवस्तस्य गीयसे ॥ ५ ॥

अन्वयः—अज ! अपाम् अन्तः त्वया यद् अमोघं बीजम् उप्तम्, अतः चराचरं विश्वम् तस्य प्रभवः गीयसे ।

व्याख्या—यदिति । अज—न जायते इत्यजस्तत्सम्बुद्धौ हे अज=हे ब्रह्मन् ! अपाम् = जलानाम् । अन्तः=मध्ये । त्वया=भवता । यद् अमोघम्=अवन्ध्यम्, सफलम् । बीजम्=वीर्यम् ('बीजवीर्येन्द्रियाणि च' इत्यमरः) । उप्तम् = प्रक्षिप्तम् । अतः=अस्माद् बीजात् । चराचरम् = स्थावरं जङ्गमञ्च । विश्वम् =सम्पूर्णम् जगद् उत्पन्नमिति शेषः । तस्य = विश्वस्य । प्रभवः=कारणम् । गीयसे=कथ्यसे, अनुष्टुब्वृत्तम् ।

सरलार्थः—हे ब्रह्मन् ! जलमध्ये भवता यद्वीर्यमुत्सृष्टं, तस्मात् स्थावरं जंगमञ्च सर्वं जगदुत्पन्नम् । लोकैः जगतः कारणं भवान् कथ्यते ।

हिन्दी—हे ब्रह्मन् ! जल के मध्य आपने जो अपने अमोघ वीर्य को डाला, उसी से चर तथा अचर समस्त विश्व उत्पन्न हुआ । अतः सभी लोग विश्व की उत्पत्ति का कारण आपको ही मानते हैं ।

टिप्पणी—मन्वादि महर्षियों ने ब्रह्मा के द्वारा सर्वप्रथम जल की रचना तथा तदनन्तर सृष्टि की उत्पत्ति मानी है—

अप एव ससर्जादौ तासु बीजमवासृजत् । तदण्डमभवद्धैमं सहस्रांशुसम-प्रभम् ॥ तस्मिन्नण्डे स समुत्पन्नं जगत्स्थावरजङ्गमम् ॥ (मनु० १-८, ९)

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

तिसृभिस्त्वमवस्थाभिर्महिमानमुदीरयन् ।
प्रलयस्थितिसर्गाणामेकः कारणतां गतः ॥ ६ ॥

अन्वयः—एकः त्वं तिसृभिः अवस्थाभिः महिमानम् उदीरयन् प्रलयस्थितिसर्गाणां कारणतां गतः ।

व्याख्या—तिसृभिरिति । एकः=अद्वितीयः । त्वम्=भवान्, ब्रह्मा । तिसृभिः=ब्रह्माविष्णुशिवरूपाभिस्त्रिसंख्यकाभिः । अवस्थाभिः=दशाभिः । महिमानम्=महत्त्वम् । उदीरयन्=उच्चारयन् । प्रलयस्थितिसर्गाणाम्—संहारपालनसृष्टीनाम् ('संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि' इत्यमरः) । कारणताम्=हेतुत्वम् । गतः=प्राप्तः ।

सरलार्थः—(हे ब्रह्मन् !) एकाकी त्वं ब्रह्मविष्णुशिवरूपाभिस्तिसृभिरवस्थाभिर्महत्वं प्रकटयन् सृष्टेरुत्पादनस्य पालनस्य संहारस्य च कारणतां प्राप्तः ।

हिन्दी—(हे ब्रह्मन् !) सृष्टि से पूर्व एक रूप होकर भी आप 'ब्रह्मा-विष्णु-शिव' इन तीन अवस्थाओं द्वारा महिमा को प्रकट करते हुये सृष्टि के उत्पादन, पालन तथा संहार का कारण होते हैं ॥ ६ ॥

स्त्रीपुंसावात्मभागौ ते भिन्नमूर्तेः सिसृक्षया ।
प्रसूतिभाजः सर्गस्य तावेव पितरौ स्मृतौ ॥ ७ ॥

अन्वयः—स्त्रीपुंसौ सिसृक्षया भिन्नमूर्तेः ते आत्मभागौ (स्तः) तौ एव प्रसूतिभाजः सर्गस्य पितरौ स्मृतौ ।

व्याख्या—स्त्रीति । स्त्रीपुंसौ—स्त्री च पुमांश्च स्त्रीपुंसौ=नारीनरौ ('स्त्रीयोषिदवला योषा नारी सीमन्तिनी वधूः' इत्यमरः) । सिसृक्षया—सृष्टुमिच्छा=सिसृक्षा, तया=उत्पादयितुमिच्छया । भिन्नमूर्तेः=भिन्नशरीरस्य । ते=तव । आत्मभागौ=आत्मनः भागौ आत्मभागौ=स्वदेहांशौ । स्तः । तौ=उक्तौ भागौ एव । प्रसूतिभाजः=प्रसूतिं भजतीति प्रसूतिभाक्, तस्य=उत्पत्तिभाजः । सर्गस्य=सृष्टेः । पितरौ=माता च पिता च पितरौ=जननीजनकौ । स्मृतौ=कथितौ । अनुष्टुब्वृत्तम् ।

सरलार्थः—नर-नारी सृष्टुकामतया भिन्नशरीरस्य भवतो ब्रह्मणः स्वदेहांशौ । उक्तभागावेवोत्पत्तिभाजः सर्गस्य मातापिता च कथितौ ।

CC-O. In Public Domain. Digitized by Sri Vidyabhaktha Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

हिन्दी —हे ब्रह्मन्! स्त्री तथा पुरुष की रचना करने की इच्छा से भिन्नमूर्तिवाले आपके स्वदेहांश हैं। आपके वे देहांश ही उत्पत्तिभागी सृष्टि के पितर (रचयिता माता तथा पिता) कहे गये हैं॥ ७॥

स्वकालपरिमाणेन व्यस्तरात्रिन्दिवस्य ते।
यौ तु स्वप्नाऽवबोधौ तौ भूतानां प्रलयोदयौ॥ ८॥

अन्वयः—स्वकालपरिमाणेन व्यस्तरात्रिन्दिवस्य ते यौ तु स्वप्नावबोधौ (एव) तौ भूतानां प्रलयोदयौ (स्तः)।

व्याख्या—स्वेति। स्वकालपरिमाणेन-स्वस्य कालः स्वकालस्तस्य परिमाणस्तेन=निजसमयप्रमाणेन। व्यस्तरात्रिन्दिवस्य—रात्रिश्च दिवा च रात्रिन्दिवम् व्यस्तं रात्रिन्दिवंयस्य सः, तस्य=व्यस्ताहर्निशस्य। ते=तव ब्रह्मणः। यौ=यद्वौ तु। स्वप्नावबोधौ-स्वप्नश्च अवबोधश्च स्वप्नावबोधौ=निद्राजागरणे। तौ=स्वप्नजागरण एव। भूतानाम्=प्राणिनाम्। प्रलयोदयौ-प्रलयः=संहारः च, उदयः=सृष्टिश्च, तौ। स्तः।

सरलार्थः—हे ब्रह्मन्! निज समयप्रमाणेनाहर्निशं सृष्टिप्रभृतिव्यस्तस्य भवतः निद्रा जागृतिश्चैव प्राणिनां संहारः सृष्टिश्च भवतः।

हिन्दी—हे ब्रह्मन्! अपने समय के प्रमाण (ब्रह्मवर्ष) के अनुसार रात-दिन सृष्टि आदि में व्यस्त रहने वाले आपकी निद्रा तथा जागरण हैं एवं यह (निद्रा तथा जागरण) ही प्राणियों के प्रलय तथा सृष्टि का स्वरूप है।

टिप्पणी—ब्रह्मा का काल-प्रमाण—चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते। अर्थात् सतर्युग, द्वापर, त्रेता कलयुग में प्रत्येक का एक-एक सहस्र बार समाप्त होना ब्रह्मा का एक दिन तथा इतना ही समय ब्रह्मा की एक रात्रि होती है। इस प्रकार ब्रह्मा के दिन-रात्रि का तीस गुणा समय ब्रह्मा का एक मास एवम् उसका १२ गुणा समय एक वर्ष होता है। ऐसे सौ ब्रह्मवर्ष ब्रह्मा की आयु का प्रमाण है। इनकी शतायु के अनन्तर ही विश्व में महा प्रलय होता है। वैसे जितने समय में ब्रह्मा जगते रहते हैं वही उनके द्वारा सृष्टि का समय अर्थात् ब्रह्म-दिवस तथा ब्रह्म-रात्रि ही प्रलय काल कहलाती है। जैसा कि कहा गया है :—

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

यदा स देवो जागर्ति तदेदं चेष्टते जगत् ।
यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति ॥ ८ ॥
जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः ।
जगदादिरनादिस्त्वं जगदीशो निरीश्वरः ॥ ९ ॥

अन्वयः—त्व जगद्योनिः, अयोनिः, जगदन्तः, निरन्तकः (असि) । त्वं जगदादिः, अनादिः जगदीशः निरीश्वरः (चासि) ।

व्याख्या—जगदिति । (हे ब्रह्मन् !) त्वम् = भवान् । जगद्योनिः—जगतः योनिः=संसारकारणम् ('अथो जगती लोको विष्टपं भुवनं जगत् ।' इत्यमरः) । सन् स्वयम् अयोनिः--नास्ति योनिर्यस्य सः=अकारणः । असि । जगदन्तः—जगतः=भुवनस्यान्तः=संहर्त्ता सन् अपि । निरन्तकः—निर्गतः अन्तः यस्मात् स निरन्तकः=अन्तरहितः, असि । त्वम् जगदादि-जगतः आदिः जगदादिः=लोकप्रथमः अपि स्वयम् अनादिः, नास्त्यादिर्यस्य सः अनादिः=आदिरहितः । जगदीशः—जगतां=लोकानामीशः=पतिरिति ('ईश्वरः पतिरीशिता' इत्यमरः) । सन् निरीश्वरः—निर्गतः ईश्वरः यस्मात् स निरीश्वरः=अनियम्यः असि । अनुष्टुब्वृत्तम् ।

सरलार्थः—हे ब्रह्मन् ! समस्तजगत उत्पादनकारणभूतोऽपि स्वयं कारणान्तररहितः, जगतः संहर्त्ता सन्नपि स्वयमन्तरहितः, सृष्टेः पूर्वं विद्यमानोऽपि स्वयमनादिस्तथा जगतामीश्वरः भूत्वापि स्वयमनियम्योऽसि ।

हिन्दी—(हे ब्रह्मन् !) आप विश्व की सृष्टि का कारण होकर भी स्वयं कारणहीन, संसार के संहारक होते हुये भी स्वयम् अन्तरहित, सृष्टि के आरंभ में विद्यमान होते हुये भी स्वयम् अनादि तथा संसार के ईश्वर होकर भी स्वयम् अनीश्वर हैं अर्थात् आपका कोई भी नियामक (ईश्वर) नहीं है ॥९॥

आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना ।
आत्मना कृतिना च त्वमात्मन्येव प्रलीयसे ॥१०॥

अन्वयः—त्वम् आत्मानम् आत्मना वेत्सि, आत्मानम् आत्मना सृजसि च, कृतिना आत्मना आत्मनि एव प्रलीयसे ।

व्याख्या—आत्मानमिति (हे ब्रह्मन् !) त्वम् = भवान् । आत्मानम् = स्वम् । आत्मना स्वयमेव वेत्सि = जानासि । आत्मानम्=निजम् । आत्मना=

Sri Vidyabharati Book Centre, Varanasi

CC-O. In Public Domain. Digitized by eGangotri

स्वयमेव । सृजसि=उत्पादयसि । च=तथा । कृतिना=कृतकृत्येन । आत्मना=स्वदेहेन एव प्रलीयसे=प्रलीनो भवसि ।

सरलार्थः—हे ब्रह्मन् ! त्वं निजस्वरूपं तत्सर्गोपायञ्च स्वयमेव जानासि, ततः परं तमुत्पादयसि च । पुनः निजकृतकृत्येन स्वदेहमात्मन्येव प्रलीनं करोषि ।

हिन्दी—हे ब्रह्मन् ! आप सृष्टि के पूर्व अपने स्वरूप को तथा सृष्टि के उपाय को स्वयमेव जानते एवं सृजन करते हो और अपने अवतार कार्य को समाप्त कर अपने शरीर को अपने में ही लीन कर लेते हो ।

टिप्पणी—सृष्टि-स्थिति-प्रलय का कारण ब्रह्म को बताते हुए मनु ने लिखा है ।—

एवं स सर्वं सृष्ट्वेदं मां चाचिन्त्य पराक्रमः । आत्मन्यन्तर्दधे भूयः काले कालेन पीडयन् ॥ १० ॥

द्रवः सङ्घातकठिनः स्थूलः सूक्ष्मो लघुर्गुरुः ।
व्यक्तो व्यक्तेतरश्चासि प्राकाम्यं ते विभूतिषु ॥११॥

अन्वयः—(हे प्रभो !) (त्वम्) द्रवः संघातकठिनः स्थूलः सूक्ष्मः लघुः गुरुः व्यक्तः व्यक्तेतरः च असि । विभूतिषु ते प्राकाम्यम् (अस्तीति) ।

व्याख्या—द्रव इति । (हे प्रभो !) (त्वम्) द्रवः=रसात्मकः, सरित्-समुद्रादिवदिति । संघातकठिनः—संघातेन कठिनः=महीधरादिवत् संयोगकठोरः । स्थूलः=इन्द्रियप्रत्यक्षः । सूक्ष्मः=परमाण्वादिवदतीन्द्रियः । लघुः=उत्पतनयोग्यः, तूलादिवत् । गुरुः=हेमाद्रिवदचलनीयः । व्यक्तः=कार्यरूपः । व्यक्तेतरः—व्यक्तादितरः व्यक्तेतरः=कार्यरूपादितरश्चासि । विभूतिषु=ऐश्वर्येषु । ते=तव । प्राकाम्यम्=यथा काम्यम् । अस्तीति शेषः ।

सरलार्थः—(हे प्रभो !) त्वं सरित्समुद्रादिवद्रसात्मकः, महीधरादिवत् संघात-कठोरः, इन्द्रियप्रत्यक्षः, परमाण्वादिवदतीन्द्रियः, लघुः हेमाद्रिवदचलनीयश्चासि । त्वं कार्यरूपः, कार्याभिन्नश्चाप्यसि तथा ऐश्वर्यादिषु तव यथा काम्यमस्तीति ।

हिन्दी—(हे प्रभो !) तुम नदी समुद्रादिवत् रसात्मक, पर्वतादिवत् संघातकठोर, इन्द्रियों द्वारा ज्ञातव्य, परमाणु आदिवत् सूक्ष्म, लघु, हेमाद्रिवत् गुरु, कार्यरूप से व्यक्त तथा उससे भिन्न होने के कारण अव्यक्त हो । विभूतियों में आप यथा काम्य हो अर्थात् जो चाहो सो हो सकते हो ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Panini Kanya Maha Vidyalaya Collection. Digitized by eGangotri

टिप्पणी--अष्टसिद्धियाँ--अणिमा महिमा चैव गरिमा लघिमा तथा। प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टसिद्धयः ।। ११ ।।

उद्घातः प्रणवो यासां न्यायैस्त्रिभिरुदीरणम् ।
कर्म यज्ञः फलं स्वर्गस्तासां त्वं प्रभवो गिराम् ॥१२॥

अन्वयः--(हे ब्रह्मन् !) यासां गिराम् उद्घातः, प्रणवः त्रिभिः न्यायैः उदीरणम्, यासां कर्म यज्ञः फलं स्वर्गः त्वम् तासां गिरां प्रभवः असि ।

व्याख्या--उद्घात इति । (हे ब्रह्मन् !) यासां गिराम्=यासां वाणीनाम् । उद्घातः = उपक्रमः । प्रणवः = ओङ्कारः ('ओङ्कारप्रणवौ समौ' इत्यमरः । यासां त्रिभिः=त्रिसंख्यकैः । न्यायैः=स्वरैः, उदात्तानुदात्तस्वरितैः । उदीरणम्-उच्चारणम् । यासां कर्म-कृत्यम् । यज्ञः=ज्योतिष्टमादियागः । फलम्=परिणामः । स्वर्गम्=नाकः । त्वम्=भवान् । तासां गिराम् प्रभवः=कारणम् असि ।

सरलार्थः--(हे ब्रह्मन् !) या वाणी प्रणवेनारब्धा भवति, उदात्तानुदात्तस्वरितत्रिभिर्विधैः या उच्चारिता भवति, यस्याः वाण्याः ज्योतिष्टोमादियागः कर्म फलं च नाकोऽस्ति तद्गिरां भवान् उत्पत्तिस्थानमस्ति ।

हिन्दी--हे ब्रह्मन् ! जिस वाणी का प्रारम्भ प्रणव (ओङ्कार) से किया जाता है, जो उदात्त, अनुदात्त तथा स्वरित इन तीन स्वरों से उच्चारित की जाती है, जिसका कर्मयज्ञ तथा फल स्वर्ग प्राप्ति है, उस वाणी (वेदवाणी) के आप उद्भव स्थान हैं ।। १२ ।।

त्वामामनन्ति प्रकृतिं पुरुषार्थप्रवर्तिनीम् ।
तद्दर्शिनमुदासीनं त्वामेव पुरुषं विदुः ।। १३ ।।

अन्वयः--(हे ब्रह्मन् !) त्वाम् पुरुषार्थप्रवर्तिनीं प्रकृतिम् आमनन्ति । त्वाम् एव तद्दर्शिनं उदासीनम् पुरुषं विदुः ।

व्याख्या--त्वामिति । (हे ब्रह्मन् !) त्वाम् = भवन्तम् । पुरुषार्थप्रवर्तिनीम्--पुरुषस्यार्थः पुरुषार्थः, तस्मै प्रवर्त्तत इति पुरुषार्थप्रवर्तिनी, ताम् = भोगापवर्गप्रवर्तिनीम् । प्रकृतिम् = मूलम्, प्रधानकारणम् । ('प्रधानं प्रकृतिः स्त्रियाम्' इत्यमरः) । आमनन्ति = वदन्ति । त्वाम् = भवन्तम् एव । तद्दर्शिनम्=प्रकृतिदर्शकम् । उदासीनम् = कूटस्थम् । पुरुषम्=पुमांसम् । (कपिलादयो विद्वांसः) विदुः=वदन्ति ।

Sri Vidyabharathi Book Centre, Srngeri

CC-O. In Public Domain. Digitized by eGangotri

सरलार्थः—हे ब्रह्मन् ! सांख्यास्त्वां भोगापवर्गप्रवर्तिनीं मूलप्रकृतिं कथयन्ति । कपिलादयः विद्वांसस्त्वामेव प्रकृतिदर्शकं कूटस्थं पुरुषमपि वदन्ति ।

हिन्दी—हे ब्रह्मन् ! सांख्यविद्वान् आपको पुरुषार्थ का प्रवर्त्तन करने वाली मूल-प्रकृति मानते हैं तथा कपिलादि नैयायिक तुम्हें ही मूलप्रकृति के दृष्टा कूटस्थ पुरुष भी कहते हैं ॥ १३ ॥

त्वं पितॄणामपि पिता देवानामपि देवता ।
परतोऽपि परश्चाऽसि विधाता वेधसामपि ॥ १४ ॥

अन्वयः—त्वम् पितॄणाम् अपि पिता, देवानाम् अपि देवता, परतः अपि परः, वेधसाम् अपि च विधाता असि ।

व्याख्या—त्वमिति । हे ब्रह्मन् ! त्वम्=भवान् । पितॄणाम्=अग्निष्वात्तादीनाम् । अपि । देवता=दैवतम् ('वृन्दारकाः दैवतानि पुंसि वा देवता स्त्रियाम्' इत्यमरः) । परतः=उत्कृष्टेभ्यः अपि । परः=उत्कृष्टः असि । तथा वेधसाम्=विधातॄणाम् अपि च विधाता=स्रष्टा असि ।

सरलार्थः—(हे ब्रह्मन् !) भवान् पितॄणामपि जनकः, सुराणामपि श्रेष्ठः, उत्कृष्टेष्वापि उत्कृष्टः, जगतः सृष्टिकारकाणामपि स्रष्टाऽसि ।

हिन्दी—हे ब्रह्मन् ! आप अग्निष्वात्तादि पितरों के भी जनक, देवताओं के भी देवता, श्रेष्ठों में भी श्रेष्ठ तथा जगत्सृष्टि-कर्त्ताओं में भी उनके विधाता हैं ॥ १४ ॥

त्वमेव हव्यं होता च भोज्यं भोक्ता च शाश्वतः ।
वेद्यं च वेदिता चाऽसि ध्याता ध्येयं च यत्परम् ॥ १५ ॥

अन्वयः— शाश्वतः त्वम् एव हव्यम् होता च असि, भोज्यं भोक्ता च (असि), वेद्यं वेदिता च, ध्येयं ध्याता च असि ।

व्याख्या—त्वमिति । (हे ब्रह्मन् !) शाश्वतः=सनातनः ('शाश्वतस्तु ध्रुवो नित्यसदातनसनातनाः' इत्यमरः) । त्वम्=भवान् एव । हव्यम्=पुरोडाशादिहोमसाधनम् । होता=हवनकर्त्ता, यजमानः । च । असि । त्वम् एव भोज्यम्=भक्ष्यमन्नम् । भोक्ता—भुनक्तीति भोक्ता=भक्षणकर्त्ता च असि । त्वम् एव वेद्यम्—वेदितुं योग्यं वेद्यम्=ज्ञेयम् । वेदिता=साक्षात्कर्त्ता । ध्येयम्—ध्यातुं योग्यं ध्येयम्=ध्यानयोग्यम् । ध्याता=ध्यायति इति ध्याता=ध्यानकर्त्ता चासि ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सरलार्थः—(हे ब्रह्मन् !) त्वमेव सदा पुरोडाशादि-होमसाधनरूपः, यजमानश्चासि । त्वमेव अन्नरूपः भोक्ता चासि । त्वमेव प्रपञ्चः प्रपञ्चसाक्षी च, तथा त्वमेव ध्यानयोग्यः ध्याता चासि ।

हिन्दी—(हे ब्रह्मन् !) आप ही सनातन पुराडाशादि होम साधनरूप हव्य तथा होमकर्त्ता यजमान हो । आप ही भोज्य (अन्नादि) रूप तथा आप ही भक्षणकर्त्ता हैं । आप ही वेद्य (ज्ञेय) और आप ही ज्ञाता एवम् आप ही ध्यान करने योग्य (चिन्तनीय) तथा ध्यानकर्त्ता भी हैं ॥१५॥

इति तेभ्यः स्तुतीः श्रुत्वा यथार्था हृदयङ्गमाः ।
प्रसादाभिमुखो वेधाः प्रत्युवाच दिवौकसः ॥ १६ ॥

अन्वयः—वेधाः इति तेभ्यः यथार्थाः हृदयङ्गमाः स्तुतीः श्रुत्वा प्रसादाभिमुखः दिवौकसः प्रत्युवाच ।

व्याख्या—इतीति । वेधाः = प्रजापतिः ('स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृड्विधिः' इत्यमरः) । इति = इत्थम् । तेभ्यः = देवेभ्यः । यथार्थाः—यथा अर्थः यासां ताः = सत्याः । हृदयंगमाः—हृदयं गच्छन्तीति हृदयङ्गमाः = मनोहराः । स्तुतीः = प्रार्थनाः श्रुत्वा=आकर्ण्य । प्रसादाभिमुखः—प्रसादे = प्रसन्नतायामभिमुखः=सम्मुखः यः सः=अनुग्रहोन्मुखः । दिवौकसः=देवान् । प्रत्युवाच=प्रत्यब्रवीत् ।

सरलार्थः—विधाता एवं देवेभ्यः सत्याः मनोरमाश्च स्तुतीराकर्ण्य प्रसन्नो भूत्वा देवानाह ।

हिन्दी—ब्रह्मा जी इस प्रकार देवताओं द्वारा सत्य तथा मनोरम की गई स्तुति को सुनकर और प्रसन्न होकर देवताओं से इस प्रकार कहने लगे ॥१६॥

पुराणस्य कवेस्तस्य चतुर्मुखसमीरिता ।
प्रवृत्तिरासीच्छब्दानां चरितार्था चतुष्टयी ॥ १७ ॥

अन्वयः—चतुष्टयी शब्दानां प्रवृत्तिः पुराणस्य कवेः तस्य चतुर्मुखसमीरिता सती चरितार्था आसीत् ।

व्याख्या—पुराणस्येति । चतुष्टयी=चतुर्विधा । शब्दानां=पदानाम् प्रवृत्तिः=वाग्वृत्तिः । पुराणस्य=पुरातनस्य । कवेः=सूरेः । तस्य = विधातुः

Sri Vidyabharathi Book Centre, Srngeri

CC-O. In Public Domain. Digitized by eGangotri

चतुर्मुखसमीरिता—चतुर्भिः मुखैः=वदनैः, समीरिता=उच्चरिता सती। चारितार्था=अन्वर्था। आसीत्=अभवत्।

सरलार्थः—द्रव्यगुणक्रियाजातिभेदेन परा पश्यन्ती मध्यमा वैखरीति चतुर्विधा शब्दप्रवृत्तिः पुरातनकवेर्ब्रह्मणश्चतुर्मुखैर्निर्गता सती सत्यर्था बभूव।

हिन्दी—द्रव्य-गुण-क्रिया तथा जातिभेद से परा पश्यन्ती मध्यमा तथा वैखरी चार प्रकार की शब्दों की प्रवृत्ति पुरातन कवि ब्रह्मा के चारों मुखों द्वारा निकली हुई चरितार्थ हो गई।

टिप्पणी—शब्दों की प्रवृत्ति परा-पश्यन्ति-मध्यमा तथा वैखरी चार प्रकार की निम्नवत् कही गई हैं—वैखरीशब्दनिष्पत्तिर्मध्यमा श्रुतिगोचरा। द्योतितार्था च पश्यन्ती सूक्ष्मा वागनपायिनी ॥ १७ ॥

स्वागतं स्वानधीकारान्प्रभावैरवलम्ब्य वः।
युगपद्युगबाहुभ्यः प्राप्तेभ्यः प्राज्यविक्रमाः ॥ १८ ॥

अन्वयः—हे प्राज्यविक्रमाः! स्वान् अधीकारान् प्रभावैः अवलम्ब्य युगपत् प्राप्तेभ्यः युगबाहुभ्यः वः स्वागतम्।

व्याख्या—स्वागतमिति। हे प्राज्यविक्रमाः—प्राज्यविक्रमो येषां ते तत्सम्बुद्धौ= हे प्रचुरपराक्रमाः देवाः ('प्रभूतं प्रचुर प्राज्यमदभ्रं बहुलं बहुः' इत्यमरः)। स्वान्=निजान्। अधीकारान्=नियोगान्। प्रभावैः=सामर्थ्यैः। अवलम्ब्य=अवस्थाय। युगपत्=समानकालम्। प्राप्तेभ्यः=लब्धभ्यः। युगबाहुभ्यः—युगौ इव बाहू येषां ते, तेभ्यः=विशालबाहुभ्यः ('भुजबाहू प्रवेष्टोः दोः' इत्यमरः)। वः=युष्माकम्। स्वागतम्=शुभागमनमस्तु।

सरलार्थः—हे प्रचुरपराक्रमाः देवाः! स्वशक्तिभिः स्वाधिकारानवलम्ब्य समकालं समुपलब्धेभ्यः विशालबाहुभ्यः युष्माकं शुभागमनमस्तु।

हिन्दी—हे विपुलपराक्रमी देवताओं! अपनी शक्ति से अपने अधिकारों का आश्रय लेकर एक-साथ आये हुए विशाल बाहुवाले आप सब का स्वागत है।

किमिदं द्युतिमात्मीयां न बिभ्रति यथा पुरा।
हिमक्लिष्टप्रकाशानि ज्योतींषीव मुखानि वः ॥ १९ ॥

अन्वयः—(हे देवाः!) हिमक्लिष्टप्रकाशानि ज्योतींषि इव वः मुखानि पुरा यथा आत्मीयां द्युतिं न बिभ्रति, इदं किम्?

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

व्याख्या—किमिति । (हे देवाः) हिमक्लिष्टप्रकाशानि—हिमेन क्लिष्टः प्रकाशः येषां तानि=नीहारप्रमृष्टप्रभाणि ('प्रकाशो द्योत आतपः' इत्यमरः)। ज्योतींषि=नक्षत्राणि ('दीप्ततारा हुताशेषु ज्योतिः' इति शाश्वतः)। इव =यथा । वः=युष्माकम् । मुखानि=आननानि ('वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम्' इत्यमरः)। पुरा=प्राक् यथा । आत्मीयाम्=स्वीयाम् । द्युतिम्=कान्तिम् ('शोभा कान्तिर्द्युतिश्छविः।' इत्यमरः)। न बिभ्रति=न धारयति । इदम् = एतत् किम् अस्ति ।

सरलार्थः—भो देवाः ! नीहारप्रमृष्टकान्तानि प्रदीप्तानि युष्माकं मुखानि सम्प्रति पूर्ववत् आत्मीयां कान्तिं न धारयन्ति । किमत्र कारणम् ।

हिन्दी—(हे देवताओं) नीहारम्लानकान्त-ज्योतिसदृश तुम लोगों के मुख पहले जैसे अपनी कान्ति को धारण नहीं कर रहे हैं। इसका क्या कारण है ?

प्रशमादर्चिषामेतदनुद्गीर्णसुरायुधम् ।
वृत्रस्य हन्तुः कुलिशं कुण्ठिताश्रीव लक्ष्यते ॥ २० ॥

अन्वयः—अर्चिषां प्रशमात् अनुद्गीर्णसुरायुधम् एतद् वृत्रस्य हन्तुः कुलिशं कुण्ठिताश्रि इव लक्ष्यते ।

व्याख्या-प्रशमादिति । अर्चिषाम्=तेजसाम् ('वह्नेर्द्वयोर्ज्वालिकीलावर्चिर्हेतिः शिखा स्त्रियाम्' इत्यमरः)। प्रशमात् = शान्तेः निर्वाणादित्यर्थः। अनुद्गीर्णसुरायुधम्—न उद्गीर्णमनुद्गीर्णं, सुराणामायुधं सुरायुधम्, अनुद्गीर्णं सुरायुधं यस्मात्तत् = अनुद्गतेन्द्रधनुः ('इन्द्रायुधं शक्रधनुः।' इत्यमरः)। एतत् = इदम्। वृत्रस्य=वृत्तासुरस्य । हन्तुः=संहर्तुः । कुलिशं = वज्रम् ('ह्रादिनी वज्रमस्त्री स्यात् कुलिशं भिदुरं पविः' इत्यमरः)। कुण्ठिताश्रि—कुण्ठिता अश्रयः यस्य तत् कुण्ठिताश्रि=नष्टशक्तिकोटि इव । लक्ष्यते=दृश्यते। अत्रोत्प्रेक्षाऽलङ्कारः। अनुष्टुब्वृत्तम् ।

सरलार्थः—वह्निशिखानां निर्वाणाद् अनुद्गतेन्द्रधनुश्छायमिदं वृत्रासुरस्य नाशकस्य वज्रं हतशक्तिकोटि इव दृश्यते ।

हिन्दी—अग्निशिखा के शान्त हो (बुझ) जाने से रङ्गों की कान्ति जिसकी नहीं झलकती है ऐसा दिखाई पड़ने वाला इन्द्र का वज्र नष्टकान्ति जैसा दिखलाई पड़ता है ॥२०॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

किञ्चाऽयमरिदुर्वारः पाणौ पाशः प्रचेतसः।
मन्त्रेण हतवीर्यस्य फणिनो दैन्यमाश्रितः॥ २१॥

अन्वयः—किञ्च अयम् अरिदुर्वारः प्रचेतसः पाणौ पाशः मन्त्रेण हतवीर्यस्य फणिनः दैन्यम् आश्रितः।

व्याख्या—किञ्चेति। किञ्च=किन्तु। अयम्=एषः। अरिदुर्वारः—अरिभिः=शत्रुभिः दुर्वारः=कष्टेन निवारणीयः। प्रचेतसः=वरुणस्य। पाणौ=हस्ते। पाशः=रज्जुः। मन्त्रेण=गारुडेन मन्त्रेण। हतवीर्यस्य=हतः=नष्टः वीर्यः=पराक्रमः यस्य सः तस्य=नष्टपराक्रमस्य। फणिनः=भुजङ्गस्य ('कुण्डली गूढपाच्चक्षुःश्रवाकाकोदरः फणी' इत्यमरः)। दैन्यम्=दीनताम्। आश्रितः=आश्रयंगतः। अत्र निदर्शनालङ्कारः। अनुष्टुब्वृत्तम्।

सरलार्थः—किञ्चायं शत्रुदुष्प्रधर्षः वरुणस्य हस्ते पाशः मन्त्रक्रियया नष्टपराक्रमस्य कुण्डलिनः दीनतां प्राप्तः।

हिन्दी—किन्तु यह वरुणदेव के हाथ में शत्रुनाशक पाश मन्त्र के द्वारा निर्वीर्य (निर्विष) किये गये सर्प के समान दीन मालूम पड़ता है॥२१॥

कुबेरस्य मनःशल्यं शंसतीव पराभवम्।
अपविद्धगदो बाहुर्भग्नशाख इव द्रुमः॥ २२॥

अन्वयः—अपविद्धगदः भग्नशाखः द्रुमः इव स्थितः कुबेरस्य बाहुः मनःशल्यं पराभवं शंसति इव।

व्याख्या—कुबेरस्येति। अपविद्धगदः—अपविद्धा=परित्यक्ता गदा=गदाऽस्त्रं येन सः। भग्नशाखः=भग्नाः=नष्टाः शाखाः=लताः यस्य सः ('समे शाखालते' इत्यमरः)। द्रुमः=पादपः ('द्रुःशाखाद्रुमागमः' इत्यमरः)। इव=यथा। स्थितः=अवस्थितः। कुबेरस्य=गुह्यकेश्वरस्य ('कुबेरस्त्र्यम्बकसखः यक्षराड्गुह्यकेश्वरः'। इत्यमरः)। बाहुः=भुजा। मनःशल्यम्—मनसः=चित्तस्य शल्यम्=कण्टम् ('चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः'। इत्यमरः)। पराभवम्=पराजयम्। शंसति इव=कथयतीव। अत्रोपमोत्प्रेक्षारूपकालङ्काराणां संसृष्टिः। अनुष्टुब्वृत्तम्।

सरलार्थः—त्यक्तगदास्त्रः कुबेरस्य बाहुः छिन्नशाखवृक्षसमः स्थितः हृदयशल्यं पराजयं कथयतीव।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

हिन्दी—कटी शाखाओं वाले वृक्ष के समान स्थित गदा अस्त्र का परित्याग की हुई कुबेर की भुजा मानसिक शल्य के समान पराभव को मानो प्रकट करती है ॥२२॥

यमोऽपि विलिखन्भूमिं दण्डेनास्तमितत्विषा।
कुरुतेऽस्मिन्नमोघेऽपि निर्वाणालातलाघवम् ॥ २३ ॥

अन्वयः—अस्तमितत्विषा दण्डेन यमः अपि भूमिं विलिखन् अमोघे अपि अस्मिन् निर्वाणालातलाघवं कुरुते।

व्याख्या—यम इति। अस्तमितत्विषा—अस्तमिताः = नष्टंगताः त्विषः = तेजांसि यस्य सः तेन दण्डेन = लगुडेन ('दण्डोऽस्त्री लगुडोऽपि स्यात्' इत्यमरः)। यमः = धर्मराजः। अपि भूमिम् = पृथ्वीम् ('भूमिर्भूरचलाऽनन्ता रसा विश्वम्भरा स्थिरा' इत्यमरः)। विलिखन् = घर्षयन्। अमोघे = सकले अपि। अस्मिन् = एतस्मिन् दण्डे। निर्वाणालातलाघवम्—निर्वाणं च तदालातं निर्वाणालातं, तस्य लाघवम् तत् = शान्तोल्मुकाऽनादरम्। कुरुते = विधत्ते। अत्र निदर्शनालङ्कारः। अनुष्टुब्वृत्तम्।

सरलार्थः—निस्तेजसा दण्डेन यमराड् अपि पृथ्वीं घर्षयन् सफलेऽप्यस्मिन् दण्डे शान्तोल्मुखाऽनादरं करोति।

हिन्दी—निस्तेज दण्ड से यमराज भी पृथ्वी को विदारण करते हुए इस अमोघ दण्ड पर भी बुझी हुई अग्नि की राख के समान अनादर करते हैं।२३।

अमी च कथमादित्याः प्रतापक्षतिशीतलाः।
चित्रन्यस्ता इव गताः प्रकामालोकनीयताम् ॥ २४ ॥

अन्वयः—प्रतापक्षतिशीतलाः अमी आदित्याः च कथं चित्रन्यस्ता इव प्रकामालोकनीयताम् गताः।

व्याख्या—अमीति। प्रतापक्षतिशीतलाः—प्रकृष्टं तापः प्रतापः, तस्य क्षतिस्तया शीतला = तेजःक्षयशीताः। अमी = एते। आदित्याः = सूर्याः ('सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः' इत्यमरः)। च कथम् = केन कारणेन। चित्रन्यस्ताः—चित्रे = आलेख्ये न्यस्ताः = लिखिताः। इव = यथा। प्रकामालोकनीयताम्—प्रकामम् = अत्यन्तम्। आलोकनीयताम् = अदृश्यताम्। गताः = प्राप्ताः। अत्रापि निदर्शनालङ्कारः

CC-O. Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सरलार्थः—प्रतापक्षीणतया शीताः सूर्यश्चालेख्यलिखिताः यथाऽत्यन्तमदृश्यतां गताः ।

हिन्दी—ताप के नष्ट हो जाने के कारण शीतल सूर्य किसी प्रकार चित्रलिखित जैसे अत्यन्त अदृश्य हो गये ॥२४॥

पर्याकुलत्वान्मरुतां वेगभङ्गोऽनुमीयते ।
अम्भसामोघसंरोधः प्रतीपगमनादिव ॥ २५ ॥

अन्वयः—मरुतां पर्याकुलत्वात् वेगभङ्गः, अम्भसां प्रतीपगमनात् ओघसंरोधः इव अनुमीयते ।

व्याख्या—पर्याकुलत्वादिति । मरुतां = पवनानाम् ('समीरमारुतमरुज्जगत्प्राणसमीरणः' इत्यमरः) । पर्याकुलत्वात्—पर्याकुलानां भावः पर्याकुलत्वं, तस्मात्=स्खलितगतित्वात् । वेगभङ्गः = वेगावरोधः । अम्भसां = वारिणाम् ('अम्भोर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम्' इत्यमरः) । प्रतीपगमनात्—प्रतीपं च तद् गमनं प्रतीपगमनं, तस्मात् गमनात्=विपरीतगमनात् । ओघसंरोधः—ओघस्य=प्रवाहस्य, संरोधः=प्रतिबन्धः । इव=यथा । अनुमीयते = तर्क्यते । अत्रोपमालङ्कारः । अनुष्टुब्वृत्तम् ।

सरलार्थः—पवनानां स्खलितगतित्वाद्वेगनाशः वारिणां विपरीतगमनात् प्रवाहावरोधः इव तर्क्यते ।

हिन्दी—पवनों की स्खलितगति होने के कारण वेगनाश, जल के विपरीत गमन से प्रवाह का अवरोध जैसा प्रतीत होता है ॥२५॥

आवर्जितजटामौलिविलम्बिशशिकोटयः ।
रुद्राणामपि मूर्धानः क्षतहुङ्कारशंसिनः ॥ २६ ॥

अन्वयः—आवर्जितजटामौलिविलम्बिशशिकोटयः रुद्राणाम् अपि मूर्धानः क्षतहुङ्कारशंसिनः ।

व्याख्या—आवर्जितेति । आवर्जितजटामौलिविलम्बिशशिकोटयः—जटानां मौलयः जटामौलयः, आवर्जिताश्च ते जटामौलयः, तेषु विलम्बत इति आवर्जितजटामौलिविलम्बिभ्यः शशिनः कोटयः येषां ते=संस्तजटाजूटालम्बमानचन्द्रलेखाः । रुद्राणाम्=एकादशरुद्राणाम् अपि ('व्योमकेशो भवो भीमः स्थाणु रुद्र उमापतिः'

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

इत्यमरः)। मूर्धानः=उत्तमाङ्गानि ('शिरः शीर्षं मूर्धानो मस्तकोऽस्त्रियाम्' इत्यमरः)। क्षतहुङ्कारशंसिनः--क्षतश्चासौ हुङ्कारः क्षतहुंकारस्तं शंसन्ति इति=नष्टाहंङ्कारसूचकाः सन्ति। अत्र स्वभावोक्तिरलङ्कारः। अनुष्टुब्वृत्तम्।

सरलार्थः—पराजयदुःखावनम्राः जटाजूटावलम्बिनः शशिरेखायुक्तः एकादशरुद्राणामपि मस्तकाः स्वहुङ्कारशक्तिविनाशं सूचयन्ति।

हिन्दी पराजय-दुःख से अवनत जटाजूट का आश्रय लिए हुए चन्द्ररेखा युक्त एकादश रुद्रों के मस्तक अपनी हुङ्कारशक्ति के विनाश की सूचना देते हैं ॥२६॥

लब्धप्रतिष्ठाः प्रथमं यूयं किं बलवत्तरैः।
अपवादैरिवोत्सर्गाः कृतव्यावृत्तयः परैः॥ २७॥

अन्वयः -प्रथमं लब्धप्रतिष्ठाः यूयं बलवत्तरैः परैः उत्सर्गाः अपवादैः इव कृतव्यावृत्तयः (भवथ)।

व्याख्या—लब्धप्रतिष्ठा इति। प्रथमं=पूर्वम्। लब्धप्रतिष्ठाः-लब्धा प्रतिष्ठा यैस्ते = प्राप्तसम्माना:। यूयम्=देवाः। बलवत्तरैः-अतिशयेन बलवन्तः बलवत्तरास्तैः=अतिशयशक्तिशालिभिः। परैः=शत्रुभिः ('अभिघातिपराऽऽरातिप्रत्यर्थिपरिपन्थिनः' इत्यमरः)। उत्सर्गाः=परित्यक्ताः, 'मा हिंस्यात् सर्वभूतानि' इति एवम् अपवादैः इव=विशेषशास्त्रैरिव। 'अग्निषोमीयं पशुमालभेत' इति कृतव्यावृत्तयः विहितप्रतिष्ठाभङ्गाः। भवथ।

सरलार्थः--निरवकाशापवादैः सावकाशसामान्यशास्त्राणीव पूर्वं प्राप्तस्थितयो भवन्तः बलाधिक्यात् प्रबलशत्रुभिः कृतप्रतिष्ठाभङ्गाः जाताः किमिति।

हिन्दी—पूर्व-प्रतिष्ठाप्राप्त किए हुए आपलोग बलशाली शत्रुओं द्वारा अपवादों से उत्सर्ग किए गए जैसे क्या प्रतिष्ठा खो चुके हैं ? ॥२७॥

तद् ब्रूत वत्साः किमितः प्रार्थयध्वं समागताः।
मयि सृष्टिर्हि लोकानां रक्षा युष्मास्ववस्थिता॥ २८॥

अन्वयः--तद् वत्साः! समागताः यूयम् इतः किं प्रार्थयध्वम्। ब्रूत, हि मयि लोकानां सृष्टिः रक्षा युष्मासु अवस्थिता।

व्याख्या—तदिति। तत्=तत्कारणात्। वत्साः=हे पुत्राः! समागताः=समायाताः। यूयम्। इतः=अस्मात्, मत्तः। किं प्रार्थयध्वम्=किमभिलषत ?

Sri Vidyabharathi Book Centre, Srisaila

CC-O. In Public Domain. Digitized by eGangotri

ब्रूत=कथयत । हि=यतः । मयि । लोकानाम्=भुवनानाम् ('लोकस्तु भुवने जने' इत्यमरः) । सृष्टिः = सर्जनम् । अवस्थिता = स्थिता । रक्षा=रक्षणं तु युष्मासु= भवत्सु । अवस्थिता = स्थितेति ।

सरलार्थः—अतः हे सुताः ! एकत्रिताः समागताः यूयं मत्तः यदभीप्सितं, तत् कथयत । यतः रजोगुणावलम्बिनि मयि लोकसृष्टिर्निर्भरा, रक्षणं तु युष्मासु नियतेति ।

हिन्दी—अतएव हे पुत्रों ! इकट्ठे होकर मेरे पास आये हुए तुम सब मुझसे क्या चाहते हो, यह शीघ्र बतलाओ ! क्योंकि लोकों की सृष्टि करना मेरे ऊपर निर्भर है पर उनकी रक्षा करना तो तुम सब पर ही स्थित है ॥२८॥

ततो मन्दाऽनिलोद्धूतकमलाकरशोभिना ।
गुरुं नेत्रसहस्रेण नोदयामास वासवः ॥ २९ ॥

अन्वयः—ततः वासवः गुरुं मन्दानिलोद्धूतकमलाकरशोभिना नेत्रसहस्रेण नोदयामास ।

व्याख्या—तत इति । ततः = तदनन्तरम् । वासवः=इन्द्रः ('वासवो वृत्रहा वृषा' इत्यमरः) । गुरुम्=बृहस्पतिदेवम् ('बृहस्पतिः सुराचार्यो गीष्पतिर्धिषणो गुरुः' इत्यमरः) । मन्दानिलोद्धूतकमलाकरशोभिना—मन्दश्चासौ अनिलः मन्दानिलस्तेनोद्धूतः कमलानामाकरः, स इव शोभते इति मन्दानिलोद्धूतकमलाकरशोभि, तेन = मन्दपवनोद्धूतपद्माकरशोभिना ('पृषदश्वो गन्धवहो गन्धवाहानिलाशुगाः ।' 'सहस्रपत्रं कमलं शतपत्रं कुशेशयम् ।' 'खनिः स्त्रियामाकरः स्यात् ।' इति चामरः) । नेत्रसहस्रेण—नेत्राणां सहस्रं, तेन = नयनसहस्रेण ('लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी' इत्यमरः) । नोदयामास = प्रेरयामास ।

सरलार्थः— ब्रह्मणः कथनानन्तरं शक्रो देवगुरुं बृहस्पतिं मन्दपवनप्रकम्पितकमलाकरकान्तेन नयनसहस्रेण कथनाय प्रेरयामास ।

हिन्दी—तदनन्तर देवराज इन्द्र ने गुरु बृहस्पति देव को मन्द पवन से हिलाये गये कमल-समूह के सदृश शोभा वाले सहस्रनयनों से (कुछ) कहने के लिए प्रेरित किया ॥ २९ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

स द्विनेत्रं हरेश्चक्षुः सहस्रनयनाऽधिकम् ।
वाचस्पतिरुवाचेदं प्राञ्जलिर्जलजासनम् ॥ ३० ॥

अन्वयः—हरेः सहस्रनयनाधिकं द्विनेत्रं चक्षुः सः बृहस्पतिः प्राञ्जलिः सन् जलजासनम् इदम् उवाच ।

व्याख्या—स द्विनेत्रमिति । हरेः=वासवस्य । सहस्रनयनाधिकं—सहस्रात्=सहस्रसंख्यकात् नयनेभ्यः अधिकम्=बहुलम् । द्विनेत्रम्—द्वौ=धर्मश्चार्थश्च नयने=नेत्रे, यस्य तत् । चक्षुः=लोचनभूतम् । सः=असौ । बृहस्पतिः=देवगुरुः । ('जीव आङ्गिरसो वाचस्पतिः' इत्यमरः) । प्राञ्जलिः सन्=बद्धाञ्जलिः सन् । जलजासनम्—जलाज्जातं जलजं कमलम्, जलजमासनं यस्य सः, तम्=कमलवासिनम् । इदम्=एतत् । उवाच=प्राह । अत्र परिणामोऽलङ्कारः । अनुष्टुब्वृत्तम् ।

सरलार्थः—देवराजस्येन्द्रस्य दशशतलोचनाधिकधर्मार्थद्विनयनात्मकनयनभूतः सः गुरुः बद्धाञ्जलिर्ब्रह्माणमिदमाह ।

हिन्दी—इन्द्र के सहस्र-नयनों से भी अधिक धर्मार्थरूपी दो नयनों वाले नयन रूप बृहस्पति ने हाथ जोड़े हुए जलजासन ब्रह्माजी से इस प्रकार कहा ।

टिप्पणी—इस श्लोक में द्विनेत्रचक्षुः कहकर बृहस्पति की ओर इंगित किया है । अर्थात् देवगुरु तो धर्म तथा अर्थ दृष्टि वाले हैं । और शुक्राचार्य (असुरगुरु) के द्वारा राजा बलि के यज्ञ में विघ्न डालने के कारण भगवान् विष्णु ने शुक्राचार्य को धर्म-दृष्टि से विफल कर दिया था । कवि ने यह गुरु तथा शुक्र दोनों में अन्तर ध्वनित किया है ॥ ३० ॥

एवं यदात्थ भगवन् ! आमृष्टं नः परैः पदम् ।
प्रत्येकं विनियुक्तात्मा कथं न ज्ञास्यसि प्रभो ॥ ३१ ॥

अन्वयः—भगवन् ! (यद्) आत्थ, तद् एवम् । नः पदं परैः आमृष्टम् । प्रभो ! प्रत्येकं विनियुक्तात्मा (त्वं) कथं न ज्ञास्यसि ।

व्याख्या—एवमिति । भगवन्—भगः अस्ति यस्य सः भगवान्, तत्सम्बुद्धौ=हे सर्वैश्वर्यसम्पन्नप्रभो ! यत् आत्थ=यत्कथयसि । तत् एवम्=तदेतत्प्रकारकम् एव । नः=अस्मान् । पदम्=अधिकारपदम् । परैः=अन्यैः, शत्रुभिः ('अभिघातिपरारातिप्रत्यर्थिपरिपन्थिनः' इत्यमरः) । आमृष्टम्=

Sri Vidyabharathi Book Centre, Srirgeri

CC-O. In Public Domain. Digitized by eGangotri

आक्षिप्तम । प्रभो ! = हे भगवन् ! प्रत्येकम्—एकमेकं प्रत्येकं=प्रतिपुरुषम् । विनियुक्तात्मा = विनियुक्तः आत्मा येन सः=अव्यवस्थापितरूपः । त्वम्=भवान्। कथं न ज्ञास्यसि=कथं न वेत्स्यसि, अपितु ज्ञास्यस्येव ।

सरलार्थः—हे प्रभो ! भवान् यत्कथयति तत्सत्यम् । अस्माकमैन्द्रादिपदं शत्रुभिराक्रान्तम् । स्वामिन् ! सर्वान्तर्व्यापी भवान् ज्ञास्यत्येवेति ।

हिन्दी– हे भगवन् ! आप जैसा कहते हैं, ऐसा ही है । हमारे ऐन्द्रादि अधिकार पद को शत्रुओं ने छीन लिया है। हे प्रभो ! आप प्रत्येक में व्याप्त हैं । अतः आप इस वृत्तान्त को कैसे नहीं जानते हैं, अवश्यमेव जानते होंगे ।

टिप्पणी—'भग' शब्द समस्त ऐश्वर्य, वीर्य, यशः, श्री, ज्ञान तथा वैराग्य छह के पर्याय में आता है—ऐश्वर्यस्य समस्तस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां 'भग' इतीरितः ॥ (विष्णुपुराण) ॥ ३१ ॥

भवल्लब्धवरोद्दीर्णस्तारकाख्यो महासुरः ।
उपप्लवाय लोकानां धूमकेतुरिवोत्थितः ॥ ३२ ॥

अन्वयः—(हे भगवन् !) भवल्लब्धवरोद्दीर्णः तारकाख्यः महासुरः धूमकेतुः इव लोकानाम् उपप्लवाय उत्थितः ।

व्याख्या—भवदिति । (हे भगवन् !) भवल्लब्धवरोद्दीर्णः—भवतः लब्धः भवल्लब्धः, भवल्लब्धश्चासौ वरः, तेनोद्दीर्णः=त्वत्प्राप्तवरोद्धतः । ('देवाद्वृतेः वरः श्रेष्ठे त्रिषु क्लीबं मनाक् प्रिये' इत्यमरः) । तारकाख्यः = तारकाभिधः ('आख्याह्वे अभिधानं च नामधेयं च नाम च' इत्यमरः) । महासुरः—महांश्चासौ असुरः महासुरः = महादैत्यः ('असुरा दैत्यदैतेयदनुजेन्द्रारिदानवाः' इत्यमरः) । धूमकेतुः इव = धूमाकारकेतुः समः । उपप्लवाय = उत्पाताय । उत्थितः = उत्पन्नो जात इति । अत्रोपमालङ्कारः । अनुष्टुब्वृत्तम् ।

सरलार्थः—हे प्रभो ! भवतः वरं प्राप्य यदोद्धतस्तारकाभिधो महादैत्यः लोकोपद्रवायोत्पन्नः अस्तीति ।

हिन्दी—हे ब्रह्मन् ! आप से वरदान पाकर मदोद्धत तारक नामक महादानव लोकों का विनाश करने के लिए धूमकेतु सदृश उत्पन्न हुआ है ।

टिप्पणी—धूमकेतु—यह एक नक्षत्र है । जिसके उदय होने पर संसार

CC-O. Vasishtha Tripathi Collection. By Siddhanta eGangotri Gyaan Vyaabharathi Book Centre, Shingeri

CC-O. In Public Domain. Digitized by eGangotri

में उत्पात होते हैं--उत्तिष्ठति यदा भीमो धूमकेतुर्नभस्तले।
तदा विनश्यति क्षिप्रं जगदेतच्चराचरम् ॥ (गर्गसंहिता)

सप्तभिः श्लोकैः सूर्यानुवृत्तिमाह--

पुरे तावन्तमेवाऽस्य तनोति रविरातपम्।
दीर्घिकाकमलोन्मेषो यावन्मात्रेण साध्यते ॥ ३३ ॥

अन्वयः--अस्य पुरे रविः तावन्तम् आतपं तनोति, यावन्मात्रेण दीर्घिकाकमलोन्मेषः साध्यते।

व्याख्या--पुर इति। अस्य = एतस्य तारकासुरस्य। पुरे=नगरे। रविः= ('भानुर्हंसः सहस्रांशुस्तपनः सविता रविः' इत्यमरः)। तावन्तम् = तावन्मात्रमेव। आतपं=घर्मम्। तनोति = विस्तारयति। यावन्मात्रेण=यावत्या मात्रया। दीर्घिकाकमलोन्मेषः--दीर्घिकासु कमलानि दीर्घिकाकमलानि, तेषामुन्मेषः = वापीपद्मविकासः ('वापी तु दीर्घिका' इत्यमरः)। साध्यते = निष्पाद्यते।

सरलार्थः--तारकासुरपुरे सूर्यः अपि यावन्मात्रेणातपेन वापीपद्मविकासो भवति, तावन्मात्रमेवातपं प्रसारयति।

हिन्दी—इस (तारकासुर) के नगर में सूर्य भी बावली के कमलों के विकसित हो जाने भर की मात्रा में अपना आतप (धूप) फैलाता है ॥ ३३ ॥

सर्वाभिः सर्वदा चन्द्रस्तं कलाभिर्निषेवते।
नादत्ते केवलां लेखां हरचूडामणीकृताम् ॥ ३४ ॥

अन्वयः--चन्द्रः तं सर्वदा सर्वाभिः कलाभिः निषेवते, केवलां हरचूडामणीकृतां लेखां न आदत्ते।

व्याख्या—सर्वाभिरिति। चन्द्रः = विधुः ('हिमांशुश्चन्द्रमाश्चन्द्रः इन्दुः कुमुदबान्धवः' इत्यमरः)। तं=तारकासुरम्। सर्वदा = नित्यम्। सर्वाभिः = समस्ताभिः। कलाभिः ('कला तु षोडशो भागः' इत्यमरः)। निषेवते=आश्रयते। केवलाम्=एकाम्। हरचूडामणीकृताम्—हरति पापमिति हरः, न चूडामणिः अचूडामणिः, यथा सम्पद्यते तथा कृता, हरस्य चूडामणीकृता हरचूडामणीकृता, ताम्। लेखाम्=कलाम्। न आदत्ते=न गृह्णाति।

सरलार्थः—चन्द्रमा तारकासुरं नित्यं सम्पूर्णाभिः कलाभिराश्रयते। केवलां शिवशिरोभूषणीकृतां कलां न गृह्णाति।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

हिन्दी—चन्द्रमा तारकासुर का नित्य (कृष्ण तथा शुक्ल पक्ष दोनों में) समस्त कलाओं से सेवन करता है केवल शिव शिर पर भूषण बनी लेखा (कला) को ग्रहण नहीं करता है ॥ ३४ ॥

व्यावृत्तगतिरुद्याने कुसुमस्तेयसाध्वसात् ।
न वाति वायुस्तत्पार्श्वे तालवृन्ताऽनिलाऽधिकम् ॥ ३५ ॥

अन्वयः—वायुः कुसुमस्तेयसाध्वसात् उद्याने व्यावृत्तगतिः सन् तत्पार्श्वे तालवृन्तानिलाधिकं न वाति ।

व्याख्या—व्यावृत्तगतिरिति । वायुः = पवनः ('श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः' इत्यमरः) । कुसुमस्तेयसाध्वसात्—स्तेनस्य = चौरस्य भावः स्तेयं=चौर्यम्, कुसुमानां = पुष्पाणां स्तेयं कुसुमस्तेयं, तस्मात् साध्वसम्, तस्मात् ('स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम्' 'चौरिकास्तैन्यचौर्ये च स्तेयमिति' चाप्यमरः) । उद्याने-आरामे । व्यावृत्तगतिः—व्यावृत्ता गतिर्यस्य सः = निवृत्तमनः सन् । तत्पार्श्वे = तन्निकटे । तालवृन्तानिलाधिकम् - तालवृन्तस्य = व्यजनस्यानिलः, तस्मादधिकम् ('व्यजनं तालवृन्तं' 'पृषदश्वो मन्धवहो गन्धवाहोऽनिलाशुगः' इतिचामरः) । न वाति=न वहति ।

सरलार्थः— पवनः उद्यानपुष्पापहारसाहसमाशङ्क्य निवृत्तचेतः सन् तत्सन्निकटे व्यजनपवनः अधिकं न वहति ।

हिन्दी—वायु उद्यान में पुष्पों के पतन के भय से निवृत्तमन होकर तारकासुर के निकट पंखे की वायु से अधिक वायु नहीं करते हैं ॥ ३५ ॥

पर्यायसेवामुत्सृज्य पुष्पसम्भारतत्पराः ।
उद्यानपालसामान्यमृतवस्तमुपासते ॥ ३६ ॥

अन्वयः—ऋतवः पर्यायसेवाम् उत्सृज्य पुष्पसम्भारतत्पराः सन्तः उद्यानपालसामान्यं तम् उपासते ।

व्याख्या—पर्यायेति । ऋतवः = वसन्तादयः । पर्यायसेवाम् = क्रमिकसेवनम् । उत्सृज्य = परित्यज्य । पुष्पसम्भारतत्पराः-पुष्पाणां सम्भारस्तस्मिन् तत्पराः=कुसुमसंग्रहसंलग्नाः सन्तः । उद्यानपालसामान्यम्-उद्यानं पालयन्तीति

CC-O. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-O. In Public Domain. Digitized by eGangotri

उद्यानपालाः, तैः सामान्यं यथा स्यात्तथा = आरामरक्षकसाधारणम् । तम्= तारकासुरम् । उपासते=सेवते ।

सरलार्थः—वसन्तादयः षड्ऋतवः क्रमिक सेवां परित्यज्य कुसुम-संग्रहासक्ताः सन्तः आरामरक्षकसाधारणं तारकासुर सेवते ।

हिन्दी--वसन्तादि षड् ऋतुएँ क्रमिकसेवा को छोड़कर पुष्पों के संग्रह में आसक्त होकर उद्यानरक्षक-सामान्य उस तारकासुर की सेवा करती हैं ॥३६॥

तस्योपायनयोग्यानि रत्नानि सरितां पतिः ।
कथमप्यम्भसामन्तरानिष्पत्तेः प्रतीक्षते ॥ ३७ ॥

अन्वयः--सरितां पतिः तस्योपायनयोग्यानि रत्नानि अम्भसाम् अन्तः आनिष्पत्तेः कथम् अपि प्रतीक्षते ।

व्याख्या—तस्येति । सरितां पतिः = सागरः ('ईश्वरः पतिरीशिता' इत्यमरः) । तस्य=तारकासुरस्य । उपायनयोग्यानि = उपायनस्य=उपहारस्य योग्यानि=अर्हाणि ('उपायनमुपग्राह्यमुपहारस्तथोपदा' इत्यमरः) । रत्नानि = मणीन् अम्भसाम् = जलानाम् ('अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम्' इत्यमरः) । अन्तः = मध्ये । आनिष्पत्तेः = आपरिपाकान्तम् । कथम् अपि = केनापि प्रकारेण । प्रतीक्षते = प्रतीक्षां करोति ।

सरलार्थः--सागरः तारकासुरस्योपहारार्हाणि मणीन् पयसां मध्ये परि-पाकपर्यन्तं महता प्रयत्नेन परिपालयति ।

हिन्दी—समुद्र तारकासुर की भेंट योग्य रत्नों को जल के मध्य होने वाली परिपाक अवस्था की बड़े प्रयत्न से प्रतीक्षा करता है ॥ ३७ ॥

ज्वलन्मणिशिखाश्चैनं वासुकिप्रमुखा निशि ।
स्थिरप्रदीपतामेत्य भुजङ्गाः पर्युपासते ॥ ३८ ॥

अन्वयः—ज्वलन्मणिशिखाः वासुकिप्रमुखाः भुजङ्गाः च निशि स्थिर-प्रदीपताम् एत्य एनम् पर्युपासते ।

व्याख्या—ज्वलन्निति । ज्वलन्मणिशिखाः—मणीनां शिखाः मणिशिखाः ('वह्नेर्द्वयोर्ज्वालिकीलार्चिर्हेतिः शिखा स्त्रियाम्' इत्यमरः), ज्वलन्त्यः मणि-शिखाः इति ज्वलन्मणिशिखाः = प्रदीप्तरत्नशिखाः । वासुकिप्रमुखाः—वासुकिः

Sri Vidyabharathi Book Centre, Srirgeri

CC-O. In Public Domain. Digitized by eGangotri

=तक्षकराट् प्रमुखः येषां ते। भुजङ्गाः=सर्पाः ('सर्पः पृदाकुर्भुजगो भुजङ्गोऽहिर्भुजङ्गमः' इत्यमरः)। च निशि=रजन्याम्। ('निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा' इत्यमरः)। स्थिरप्रदीपताम् –स्थिरश्चासौ प्रदीपस्तस्य भावस्ताम् =अनिर्वाणदीपताम् एत्य=प्राप्य। एवम्=तारकासुरम्। पर्युपासते = परिसेवते।

सरलार्थः—देदीप्यमानरत्नशिखाः वासुकिमुख्याः सर्पाश्च रजन्यामनिर्वाणदीपतां प्राप्यः तारकासुरं परिसेवते।

हिन्दी—देदीप्यमान मणिशिखाएँ तथा सर्प रात्रि में स्थिर प्रदीपकत्व को प्राप्त होकर तारकासुर की सेवा करती हैं॥ ३८॥

तत्कृताऽनुग्रहापेक्षी तं मुहुर्दूरहारितैः।
अनुकूलयतीन्द्रोऽपि कल्पद्रुमविभूषणैः॥ ३९॥

अन्वयः—इन्द्रः अपि तत्कृतानुग्रहापेक्षी सन् मुहुः दूरहारितैः कल्पद्रुमविभूषणैः तम् अनुकूलयति।

व्याख्या—तत्कृतेति। इन्द्रः=शक्रः अपि ('इन्द्रो मरुत्वान् मघवा विडौजः पाकशासनः' इत्यमरः)। तत्कृतानुग्रहापेक्षी—तेन=तारकासुरेण कृतः =विहितः, अनुग्रहः=प्रसादः, तमपेक्षते तच्छीलः इति तत्कृतानुग्रहापेक्षी सन्। मुहुः=वारंवारम्। दूरहारितैः=दूरं प्रापितैः। कल्पद्रुमविभूषणैः—कल्पद्रुमाणां विभूषणानि, तैः=कल्पपादपालङ्कारैः। तम्=तारकासुरम्। अनुकूलयति = अनुकूलं करोति।

सरलार्थः—देवेन्द्रः शक्रः अपि तारकासुरकृतप्रसादप्रार्थी सन् वारं वारं दूरप्रापितैः कल्पवृक्षालङ्कारैः तारकासुरमनुकूलं करोति।

हिन्दी –देवराज इन्द्र भी तारकासुर के द्वारा की गई कृपा के लिए बार-बार दूर पहुँचाये हुए कल्पवृक्ष के अलङ्कारों द्वारा तारकासुर को अनुकूल करने का प्रयत्न करते हैं॥ ३९॥

इत्थमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयम्।
शाम्येत्प्रत्यपकारेण नोपकारेण दुर्जनः॥ ४०॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अन्वयः—इत्थम् आराध्यमानः अपि सः भुवनत्रयम् क्लिश्नाति । तथाहि दुर्जनः प्रत्यपकारेण शाम्येत्, उपकारेण न शाम्येत् ।

व्याख्या—इत्थमिति । इत्थम्=अनेन प्रकारेण । आराध्यमानः=सेव्यमानः । अपि सः=असौ तारकासुरः । भुवनत्रयम्—भुवनानां त्रयमिति भुवनत्रयम्=त्रिलोकम् ('त्रिष्वपो जगतो लोको विष्टपं भुवनं जगत् ।' इत्यमरः)। क्लिश्नाति =पीडयति । तथाहि=यतो हि । दुर्जनः=दुष्टः जनः । प्रत्यपकारेण—प्रत्यपकरणं प्रत्यपकारः, तेन एव । शाम्येत्=शान्तो भवति, उपकारेण=उपकृत्वा । न शाम्येत् नैव शान्तो भवेत् । अत्रार्थान्तरन्यासः अलङ्कारः ।

सरलार्थः—अनेन प्रकारेण सेव्यमानः अपि तारकासुरः लोकत्रयं पीडयति । यतो हि दुष्टः पुरुषः प्रतीकारेणैव शान्तो भवति उपकारेण तु नैव शान्तो भवति ।

हिन्दी—इस प्रकार सेवित होकर भी तारकासुर त्रिभुवन को पीड़ित करता है; क्योंकि दुष्ट पुरुष प्रतीकार से ही शान्त होता है, उपकार से शान्त नहीं होता है ॥ ४० ॥

अथ नन्दनवनवृक्षापहरणमाह—

तेनाऽमरवधूहस्तैः सदयालूनपल्लवाः ।
अभिज्ञाश्छेदपातानां क्रियन्ते नन्दनद्रुमाः ॥ ४१ ॥

अन्वयः—तेन अमरवधूहस्तैः सदयालूनपल्लवाः नन्दनद्रुमाः छेदपातानाम् अभिज्ञाः क्रियन्ते ।

व्याख्या—तेनेति । तेन = तारकासुरेण । अमरवधूहस्तैः—अमराणां वध्वः अमरवध्वस्तासां हस्तैः=देवाङ्गनाकरैः ('अमराः निर्जरा देवास्त्रिदशाः विबुधाः सुराः ।' इत्यमरः) । सदयालूनपल्लवाः—दयया सहितं यथा स्यात् तथा सदयम्, सदयम् आलूनाः पल्लवाः येषां ते सदयालूनपल्लवाः=सकृपच्छिन्नदलाः ('कृपा दयाऽनुकम्पा स्यादनुक्रोशः' इत्यमरः) । नन्दनद्रुमाः = नन्दनवृक्षाः । छेदपातानां—छेदाश्च पाताश्च छेदपातास्तेषां छेदपातानाम् = द्वैधीकरणपातानाम् । अभिज्ञाः=ज्ञातारः । क्रियन्ते = सम्पाद्यन्ते ।

सरलार्थः—तारकासुरेण सुराङ्गनाकरैः सकृपया छिन्नदला नन्दनपादपाः छेदपातानां ज्ञातारः क्रियन्ते ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

हिन्दी—देवाङ्गनाओं द्वारा हाथों से जिन नन्दनवृक्षों के पल्लवों को दया के साथ तोड़ा जाता था, उन्हीं वृक्षों को तारकासुर निर्दयता से काटकर गिरा देता है ॥ ४१ ॥

वीज्यते स हि संसुप्तः श्वाससाधारणानिलैः ।
चामरैः सुरवन्दीनां बाष्पसीकरवर्षिभिः ॥ ४२ ॥

अन्वयः—हि सः संसुप्तः सन् श्वाससाधारणानिलैः बाष्पसीकरवर्षिभिः सुरवन्दीनां चामरैः वीज्यते ।

व्याख्या—वीज्यत इति । हि=यतः । सः=तारकासुरः । संसुप्तः सन्=संविष्टः सन् । श्वाससाधारणानिलैः—श्वासेन साधारणः अनिलः येषां तानि, तैः=निःश्वाससामान्यपवनैः । बाष्पसीकरवर्षिभिः—बाष्पाणां सीकराः बाष्पसीकराः, बाष्पसीकरान् वर्षन्तीति तच्छीलानि बाष्पसीकरवर्षीणि, तैः=अश्रुजलकणवर्षणशीलैः ('सीकरोऽम्बुकणः स्मृताः' इत्यमरः) । सुरवन्दीनां—सुराणां वन्द्याः सुरवन्द्याः, तासां सुरवन्दीनां=देवप्रग्रहपत्नीनाम् ('वन्दी परस्य वनिता हृता वद्धा परेण या' इति भोजः) । चामरैः=चमरीबालव्यजनैः । वीज्यते=निर्वाप्यते । अत्र पर्यायोक्त्यलङ्कारः । अनुष्टुब्वृत्तम् ।

सरलार्थः—तारकासुरः सम्यक् सुप्तः सन् निःश्वाससामान्यपवनैरश्रुजलकणवर्षणशीलैः देवप्रग्रहवनितानां मुहुर्मुहुश्चामरैर्वीजितो भवतीति ।

हिन्दी—भली भाँति सोता हुआ उस तारकासुर पर अश्रुजलकणवर्षणशील निःश्वास सामान्य पवन से वन्दी देवाङ्गनाओं द्वारा बार बार चामरों द्वारा पंखा झला जाता है ॥ ४२ ॥

उत्पाट्य मेरुशृङ्गाणि क्षुण्णानि हरितां खुरैः ।
आक्रीडपर्वतास्तेन कल्पिताः स्वेषु वेश्मसु ॥ ४३ ॥

अन्वयः—तेन हरितां खुरैः क्षुण्णानि मेरुशृङ्गाणि उत्पाट्य स्वेषु वेश्मसु आक्रीडपर्वताः कल्पिताः ।

व्याख्या-उत्पाट्येति । तेन=तारकासुरेण । हरितां=सूर्याश्वानाम् ('हरित् सूर्ये च सूर्याश्वे वर्णे च हरिते दिशि' इति विश्वः) । खुरैः=शफैः ('शफं क्लीबे खुरः पुमान्' इत्यमरः) । क्षुण्णानि=चूर्णितानि । मेरुशृङ्गाणि=मेरुशिखराणि ।

Sri Vidyabharati Book Centre, Shringeri

CC-O. In Public Domain. Digitized by eGangotri

उत्पाट्य=उन्मूल्य । स्वेषु=निजेषु । वेश्मसु=गृहेषु ('वेश्म सद्म निकेतनम्' इत्यमरः) । आक्रीडपर्वताः–आक्रीडन्त एष इति आक्रीडाः ते च ते पर्वताः इत्याक्रीडपर्वताः=क्रीडाशैलाः । कल्पिताः=कृताः (महीध्रे शिखरिक्ष्माभृदहार्यधरपर्वताः' इत्यमरः) । अत्र पर्यायोक्तयलङ्कारः । अनुष्टुब्वृत्तम् ।

सरलार्थः––तेन तारकासुरेण सुमेरुशिखरान्तभागेनानुदिनं गच्छतां सूर्याश्वानां खुरैश्चूर्णितानि सुमेरुशृङ्गाणि उन्मूल्य स्वगृहेषु क्रीडापर्वताः कृताः सन्ति ।

हिन्दी—उस तारकासुर द्वारा सुमेरु शिखरपर्यन्त भाग से अनुदिन जाते हुए सूर्याश्वों के खुरों से चकनाचूर हुए सुमेरुशृङ्ग उखाड़कर अपने घरों में क्रीडापर्वत बनाये जाते हैं ॥ ४३ ॥

मन्दाकिन्याः पयःशेषं दिग्वारणमदाविलम् ।
हेमाम्भोरुहशस्यानां तद्वाप्यो धाम साम्प्रतम् ॥ ४४ ॥

अन्वयः—साम्प्रतं मन्दाकिन्याः दिग्वारणमदाविलं पयःशेषं हेमाम्भोरुहशस्यानां तद्वाप्यः धाम आसन् इति शेषः ।

व्याख्या—मान्दाकिन्या इति । साम्प्रतम्=अधुना । मन्दाकिन्याः=गङ्गायाः ('मन्दाकिनी वियद्गङ्गा स्वर्णदी सुरदीर्घिका' इत्यमरः) । दिग्वारणमदाविलम्–दिशां वारणाः दिग्वारणास्तेषां मदास्तैराविलम् = दिक्कुञ्जरदानजलकलुषम् (दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः ।' इत्यमरः । 'मतङ्गजो गजो नागः कुञ्जरो वारणः करी' इत्यमरः)। पयः=जलम् ('पयः कीलालममृतं जीवनं भुवनं वनम् ।' इत्यमरः)। शेषम्=अवशिष्टम् । हेमाम्भोरुहशस्यानाम्–अम्भसि रोहन्तीत्यम्भोरुहाणि, हेम्नः अम्भोरुहाणि, तान्येव शस्यानि, तेषाम्=स्वर्णकमलधान्यानाम् ('विसप्रसूनराजीवपुष्कराम्भोरुहाणि च' इत्यमरः) तद्वाप्यः–तस्य वाप्यः तद्वाप्यः =तद्दीर्घिकाः । धाम=स्थानम् आसन्निति ।

सरलार्थः—सम्प्रति गङ्गायाः दिग्गजमदजलकलुषं जलमवशेषं स्वर्णकमलधान्यानां तद्दीर्घिका स्थानमासन्निति शेषः ।

हिन्दी—आजकल मन्दाकिनी का दिग्गजों के मदजल से मैला हुआ जल मात्र शेष रह गया है; क्योंकि तारकासुर ने स्वर्णकमलों को उखाड़कर अपनी बावलियों में लगाया है ॥ ४४ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अथ देवानामनुरोधमाह—

भुवनालोकनप्रीतिः स्वर्गिभिर्नानुभूयते ।
खिलीभूते विमानानां तदापातभयात्पथि ॥ ४५ ॥

अन्वयः—तदापातभयात् विमानानां पथि खिलीभूते सति स्वर्गिभिः भुवनालोकनप्रीतिः न अनुभूयते ।

व्याख्या—भुवनेति । तदापातभयात् तस्य = तारकासुरस्यापतनभयात्= आक्रमणभीतेः विमानानां वायुयानानां । पथि=मार्गे ('व्योमयानं विमानोऽस्त्री ।' इत्यमरः । 'अयनं वर्त्ममार्गाध्वपन्थानः पदवी सृतिः' इत्यमरः) । खिलीभूते सति= महतीभूते सति । स्वर्गिभिः = स्वर्गनिवासिभिः । भुवनालोकनप्रीतिः-भुवनानां= जगतामालोकनं भुवनालोकनं तस्मिन् प्रीतिः = लोकदर्शनप्रेम । 'जगती लोको विष्टपं भुवनं जगत् । इत्यमरः) । न अनुभूयते = नैव उपयुज्यते ।

सरलार्थः—तारकासुराक्रमणभीतेः व्योमयानानां वर्त्मनि सुराः भुवनदर्शनप्रेम नोपयुज्यते ।

हिन्दी—तारकासुर के आक्रमण के भय से देवता व्योमयानों के मार्ग में अन्यलोकदेखने का प्रेम अनुभव नहीं करते हैं ॥ ४५ ॥

यज्वभिः सम्भृतं हव्यं विततेष्वध्वरेषु सः ।
जातवेदोमुखान्मायी मिषतामाच्छिनत्ति नः ॥ ४६ ॥

अन्वयः—यज्वभिः विततेषु अध्वरेषु सम्भृतं हव्यं मायी सः नः मिषतां जातवेदोमुखात् आच्छिनत्ति ।

व्याख्या—यज्वभिरिति । यज्वभिः = विधिवद् इष्टवद्भिः ('यज्वा तु विधिनेष्टवान्' । इत्यमरः) । विततेषु=विस्तृतेषु । अध्वरेषु=यज्ञेषु ('यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः' । इत्यमरः) । सम्भृतम्=प्रदत्तम् । हव्यम् = हविः । मायी=मायावी । सः = असौ तारकासुरः । नः=अस्माकम् । मिषतां = पश्यताम् । जातवेदोमुखात्–जातवेद एव = अग्निरेव मुख=वक्त्रम्, तस्मात् ('कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात्' । इत्यमरः) । आच्छिनत्ति=आक्षिप्य आददाति ।

सरलार्थः—मायावी तारकासुरः विधिवदिष्टवद्भिः विस्तृतेषु यज्ञेषु दत्तां हवनसामग्रीमस्माकं पश्यतां वह्निमुखादाक्षिप्य गृह्णाति ।

CC-O. Jangamwadi Math Collection. Digitized by eGangotri

CC-O. In Public Domain. Digitized by eGangotri

हिन्दी—मायावी तारकासुर विधिवत् यज्ञ करने वालों द्वारा विस्तृत यज्ञों में दिये गये हव्य (आहुति) को हमारे देखते-देखते अग्निमुख से छीन कर ले लेता है ॥ ४६ ॥

उच्चैरुच्चैःश्रवास्तेन हयरत्नमहारि च ।
देहबद्धमिवेन्द्रस्य चिरकालार्जितं यशः ॥ ४७ ॥

अन्वयः—च तेन उच्चैः उच्चैःश्रवाः हयरत्नं देहबद्धं चिरकालार्जितम् इन्द्रस्य यशः इव अहारि।

व्याख्या—उच्चैरिति । च=तथा । तेन=तारकासुरेण । उच्चैः=उन्नतः । उच्चैःश्रवाः=उच्चैःश्रवाः नाम शक्राश्वः । हयरत्नम्-हयेषु रत्नं=अश्वश्रेष्ठम् ('वाजिवाहार्थगन्धर्वहयसैंधव सप्तयः ।' इत्यमरः) । देहबद्धम्=बद्धशरीरम्, मूर्तिमदिति भावः । चिरकालार्जितं=बहुकालसञ्चितम् । ('कायो देहः क्लीबपुमः स्त्रियां मूर्त्तिस्तनुस्तनू ।' इत्यमरः । 'कालो दिष्टोऽनेहापि समयोऽप्यथ पक्षतिः ।' इत्यमरः) । इन्द्रस्य=मघोनः । यशः=कीर्त्तिः ('यशः कीर्तिः समज्ञा च' इत्यमरः) । इव=मम् । अहारि=आहृतम् । अत्रोत्प्रेक्षालङ्कारः । अनुष्टुब्वृत्तम् ।

सरलार्थः—तारकासुरेणोन्नत उच्चैःश्रवाः अश्वश्रेष्ठं मूर्तिमत् बहुकालसञ्चित शक्रस्य यशः इवापहृतम् ।

हिन्दी—तारकासुर ने उन्नत उच्चैःश्रवा नामक अश्वश्रेष्ठ को सदेह चिरकाल-सञ्चित इन्द्र की कीर्ति के समान अपहृत कर लिया ॥ ४७ ॥

तस्मिन्नुपायाः सर्वे नः क्रूरे प्रतिहतक्रियाः ।
वीर्यवन्त्यौषधानीव विकारे सान्निपातिके ॥ ४८ ॥

अन्वयः—क्रूरे तस्मिन् नः सर्वे उपायाः सान्निपातिके विकारे वीर्यवन्ति औषधानि इव प्रतिहतक्रियाः भवन्ति ।

व्याख्या—तस्मिन्निति । क्रूरे=उद्धतस्वभावे । तस्मिन्=तारकासुरे । नः=अस्माकं । सर्वे=अखिलाः । उपायाः=प्रयत्नाः, सामादयः । सान्निपातिके—सन्निपातादुद्भवः सान्निपातिकः, तस्मिन्=सन्निपातरोगजाते । विकारे=विकृतौ । वीर्यवन्ति=शक्तिशालिनि । औषधानि इव=भेषजानि सम् ('भेषजौषधभैष-

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ज्यान्यगदो जायुरित्यपि।' इत्यमरः। 'विकारो रोगाविकृतिः।' इति वैजयन्ती)। प्रतिहतक्रियाः—प्रतिहताः क्रियाः येषां ते प्रतिहतक्रियाः=निष्फलक्रियाः। भवन्ति। अत्रोत्प्रेक्षालङ्कारः। अनुष्टुब्वृत्तम्।

सरलार्थः—सन्निपातरोगविकारे यथाऽस्माकं सर्वाण्यौषधानि विफलतां यान्ति तथैव तारकासुरेऽस्मिन् सामादयः सर्वेऽप्युपाया अस्माकं निष्फलाः भवन्ति।

हिन्दी—सन्निपात रोग के विकार में जैसे हमारी बड़ी से बड़ी औषधियाँ भी विफल हो जाती हैं, वैसे ही इस तारकासुर पर भी किये गये हमारे सामादि सभी उपाय निष्फल हो जाते हैं॥ ४८॥

जयाशा यत्र चाऽस्माकं प्रतिघातोत्थिताऽर्चिषा।
हरिचक्रेण तेनाऽस्य कण्ठे निष्कमिवाऽर्पितम्॥ ४९॥

अन्वयः—यत्र अस्माकं जयाशा प्रतिघातोत्थितार्चिषा तेन हरिचक्रेण च अस्य कण्ठे निष्कम् अर्पितम् इव।

व्याख्या—जयाशेति। यत्र=यस्मिन् हरिचक्रे। अस्माकं=नः। जयाशा=जयस्य=विजयस्य आशा=अभिलाषा (आसीत्)। प्रतिघातोत्थितार्चिषा=प्रतिघातेनोत्थितं=प्रतिघातजन्यम् अर्चिः=ज्वाला यस्य तत् प्रतिघातोत्थितार्चिस्तेन। हरिचक्रम्—हरेश्चक्रम् हरिचक्रं तेन=भगवतः विष्णोः सुदर्शनचक्रेण ('ज्वाला भासो नपुंस्यर्चिः' इत्यमरः)। च अस्य=एतस्य तारकासुरस्य। कण्ठे=गलदेशे। निष्कम्=उरोभूषणम्। ('सष्टिशते सुवर्णानां हेम्न्युरोभूषणे पले। दीनारेऽपि च निष्कोऽस्त्री।' इत्यमरः)। अर्पितम् इव=दत्तमिव। अत्रोत्प्रेक्षालङ्कारः। अनुष्टुब्वृत्तम्।

सरलार्थः—यस्मिन् सुदर्शनचक्रे अस्माकं जयस्याशा आसीत् प्रतिघातसंजातवह्निना विष्णोः सुदर्शनचक्रेणास्य तारकासुरस्य ग्रीवायामुरोभूषणं दत्तमिव।

हिन्दी—जिस सुदर्शनचक्र में विजय की हमारी आशा थी, प्रतिघात से उत्पन्न हुई आग से भगवान् विष्णु का सुदर्शन चक्र तारकासुर के गले में उरोभूषण-सा बन गया, अर्थात् सुदर्शनचक्र भी तारकासुर का संहार नहीं कर सका॥ ४९॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

तदीयास्तोयदेष्वथ पुष्करावर्तकादिषु ।
अभ्यस्यन्ति तटाघातं निर्जितैरावता गजाः ॥ ५० ॥

अन्वयः—अथ निर्जितैरावताः तदीयाः गजाः पुष्करावर्तकादिषु तोयदेषु तटाघातं अभ्यस्यन्ति ।

व्याख्या—तदीयाः इति । अथ=अनन्तरम् । निर्जितैरावताः—निर्जितः=विजितः, ऐरावतः=ऐरावतनामकः गजः=हस्ती यैस्ते । तदीयाः=तस्य इमे गजाः=करिणः ('ऐरावतोऽभ्रमातङ्गैः रावणाभ्रमुवल्लभाः' इत्यमरः) । पुष्करावर्तकादिषु—पुष्कराश्च आवर्तकाश्च ते आदयः येषां ते पुष्करावर्तकादयस्तेषु=पुष्करावर्तकप्रभृतिषु । तोयदेषु—तोयं ददतीति तोयदास्तेषु=मेघेषु । तटाघातं=वप्रक्रीडाम् । अभ्यस्यन्ति=अभ्यासं कुर्वन्तीति ।

सरलार्थः—इन्द्रगजस्यैरावतस्य विजयिता तारकासुरस्य करिणः स्वदर्पकण्डूनिवारणाय पुष्करावर्तकादिषु मेघेषु वारं वारं दन्तैः प्रहरन्ति ।

हिन्दी—इन्द्र के हाथी ऐरावत को जीतने वाले तारकासुर के हाथी अपने अभिमान की खुजली मिटाने के लिए पुष्करावर्तकादि मेघों पर बार-बार प्रहार करते हैं ॥ ५० ॥

अथ सेनापतिनिर्माणे प्रयोजनम्—

तदिच्छामो विभो ! स्रष्टुं सेनान्यं तस्य शान्तये ।
कर्मबन्धच्छिदं धर्मं भवस्येव मुमुक्षवः ॥ ५१ ॥

अन्वयः—तत् हे विभो ! मुमुक्षवः भवस्य शान्तये कर्मबन्धच्छिदं धर्मम् इव तस्य शान्तये सेनान्यं स्रष्टुम् इच्छामः ।

व्याख्या—तदिति । तत्=तस्मात् । विभो=हे प्रभो ! मुमुक्षवः—मोक्तुमिच्छवः मुमुक्षवः=मुक्त्यभिलाषिणः । भवस्य=लोकस्य । शान्तये=शान्त्यर्थम् । कर्मबन्धच्छिद—कर्मबन्धं छिनत्तीति कर्मबन्धच्छित्, तम्=कर्मबन्धनाशकम् । धर्मम्—धरति विश्वमिति धर्मस्तम्=पुण्यम् इव=यथा । तस्य=तारकराक्षसस्य । शान्तये=शमनाय । सेनान्यं—सेनां=चमूं, नयति=प्रापयतीति सेनानी, तम् सेनान्यं=सेनापतिम् । स्रष्टुम्=रचयितुम् । इच्छामः=अभिलषामः ('ध्वजिनी वाहिनी सेना पृतनाऽनीकिनी चमूः' । 'पार्वतीनन्दनः स्कन्दः सेनानीरग्निभूर्गुहः' इतिचामरः) । अत्रोपमालङ्कारः । अनुष्टुब्वृत्तम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सरलार्थः—अतः हे प्रभो ! मोक्षाभिलाषिणः संसारस्य शान्त्यर्थं कर्म-बन्धननाशकं धर्ममिव तारकासुरस्य शमनार्थं सेनापतिं निर्मितुमभिलषामः ।

हिन्दी—अतएव हे स्वामिन् ! जिस प्रकार मोक्ष की इच्छा रखने वाले व्यक्ति संसार की निवृत्ति के लिए धर्म की इच्छा करते हैं उसी प्रकार तारकासुर के नाश के लिए हमलोग देवताओं की सेना का सेनापति उत्पन्न करना चाहते हैं ॥ ५१ ॥

गोप्तारं सुरसैन्यानां यं पुरस्कृत्य गोत्रभित् ।
प्रत्यानेष्यति शत्रुभ्यो बन्दीमिव जयश्रियम् ॥ ५२ ॥

अन्वयः—सुरसैन्यानां गोप्तारं यं पुरस्कृत्य गोत्रभित् जयश्रियं बन्दीम् इव शत्रुभ्यः प्रत्यानेष्यति ।

व्याख्या—गोप्तारमिति । सुरसैन्यानां=देवसैनिकानाम् ('सेनायां समवेताः ये सैन्यास्ते सैनिकाश्च ते ।' इत्यमरः) । गोप्तारं = रक्षकम्, यं=यं सेनापतिं । पुरस्कृत्य = अग्रे कृत्वा । गोत्रभित्=इन्द्रः ('अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः ।' इत्यमरः) । जयश्रियम् = विजयलक्ष्मीम् । बन्दीम् इव=बलादपहृतमिव । शत्रुभ्यः=रिपुभ्यः प्रत्यानेष्यति=प्रत्याहरिष्यति । अत्रोपमालङ्कारः । अनुष्टुब्वृत्तम् ।

सरलार्थः—यादृशेन सेनापतिना सुरेन्द्रः शक्तिसम्पन्नो भूत्वा विजयलक्ष्मीं हठात् अपहर्त्तुं सक्षमः स्यात् तादृशः सेनापतिः सृज्यतामिति ।

हिन्दी—जिस प्रकार के सेनापति से देवराज इन्द्र शक्ति-सम्पन्न होकर स्वयं हठात् अपहृत नारी के समान विजयश्रीः वापस लौटा लाने में समर्थ हो सकें ऐसे सेनापति को उत्पन्न किया जाना चाहिये ॥ ५२ ॥

वचस्यवसिते तस्मिन्ससर्ज गिरमात्मभूः ।
गर्जितानन्तरां वृष्टिं सौभाग्येन जिगाय सा ॥ ५३ ॥

अन्वयः—तस्मिन् वचसि अवसिते सति आत्मभूः गिरं ससर्ज । सा सौभाग्येन गर्जितान्तरां वृष्टिं जिगाय ।

व्याख्या—वचसीति । तस्मिन्—एतस्मिन् बार्हस्पत्ये । वचसि=वाण्याम् । ('व्याहार उक्तिर्लपितं भाषितं वचनं वचः ।' इत्यमरः) । अवसिते=समाप्ते सति । आत्मभूः=स्वयंभूः ('स्वयंभूः शम्भुरात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः ।' इत्यमरः) ।

CC-O. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-O. In Public Domain. Digitized by eGangotri

गिरं=वाणीम् ('ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती'। इत्यमरः)। ससर्ज=उत्पादयामास। सा=सरस्वती। सौभाग्येन=मनोरमत्वेन। गर्जितान्तरां—गर्जितस्य गर्जिताद् वा अन्तरा, ताम्=गर्जनानन्तरम्। वृष्टिं=वर्षणम्। जिगाय=विजितवती।

सरलार्थः—गुरोः कथनानन्तरं विधाता यां वाणीं कथितवान्, सा वाणी घनगर्जनानन्तरं सम्भावितां वृष्टिमिव मनोरमत्वेन विजितवती।

हिन्दी—बृहस्पति के कथनोपरान्त ब्रह्माजी ने जिस वाणी का उच्चारण किया वह (वाणी) घनगर्जन के पश्चात् हुई वर्षा के समान मनोरम मालूम पड़ती थी॥ ५३॥

विधातुः वारणं प्रपञ्चयेति—

सम्पत्स्यते वः कामोऽयं कालः कश्चित्प्रतीक्ष्यताम्।
न त्वस्य सिद्धौ यास्यामि सर्गव्यापारमात्मना॥ ५४॥

अन्वयः—अयं वः कामः सम्पत्स्यते कश्चित्कालः प्रतीक्ष्यताम्। तु अस्य सिद्धौ आत्मना सर्गव्यापारं न यास्यामि।

व्याख्या—सम्पत्स्यत इति। अयम्=एषः। वः=युष्माकम्। कामः=इच्छा ('कामोऽभिलाषस्तर्षश्च' इत्यमरः)। सम्पत्स्यते=सेत्स्यति। कश्चित्=कियान्। कालः=समयः। प्रतीक्ष्यताम्=प्रतीक्षाविधीयताम्। तु=परन्तु। अस्य=कामस्य। सिद्धौ=सफलतायाम्। आत्मना=स्वयम्। सर्गव्यापारं=सर्गस्य=सृष्टेः व्यापारं=क्रियाम्। न यास्यामि अहं न गमिष्यामि।

सरलार्थः—(हे देवाः) युष्माकमेषः अभिलाषः साफल्यमेष्यति। अतस्तदर्थं समयः प्रतीक्ष्यन्ताम्। यतः वः कार्यसिद्धयर्थमहं स्वयमात्मांशेन नैव उत्पन्नो भविष्यामि।

हिन्दी—(हे देवताओं!) तुम्हारी कामना सफल होगी किन्तु इसके लिए कुछ समय प्रतीक्षा कीजिए; क्योंकि तुम्हारी कार्यसिद्ध के लिए मैं स्वयम् अपने अंश से उत्पन्न नहीं होऊँगा॥ ५४॥

इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम्।
विषवृक्षोऽपि संवर्द्ध्य स्वयं छेत्तुमसाम्प्रतम्॥ ५५॥

अन्वयः—इतः प्राप्तश्रीः सः दैत्यः इतः एव क्षयं न अर्हति। विषवृक्षः अपि संवर्द्ध्यं स्वयं छेत्तुम् असाम्प्रतम्।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

व्याख्या--इत इति । इतः=मत्सकाशात् । प्राप्तश्रीः-प्राप्ताश्रीर्येन सः प्राप्तश्रीः=लब्धश्रीः । सः=असौ । दैत्यः=तारकाभिधः राक्षसः ('असुरः दैत्यदैतेयदनुजेन्द्रारिदानवा' इत्यमरः) । इत एव=मत्तः एव । क्षयं=नाशम् । न अर्हति=योग्यः नास्ति । विषवृक्षः—विषस्य=गरलस्य वृक्षः=पादपः अपि । संवर्द्धर्य । स्वयम्=आत्मना । क्षेत्तुम्=कर्तितुम् । असाम्प्रतम्=अनुपयुक्तम् । न साम्प्रतमसाम्प्रतमिति भावः । अत्रार्थान्तरन्यासमलङ्कारः । अनुष्टुब्वृत्तम् ।

सरलार्थः—मत्तः लब्धोत्कर्षः असौ तारकराक्षसः मत्त एव नाशार्हः नास्ति । यतः विषपादपमपि सम्यग् वर्धयित्वा स्वयं छेत्तुं न युज्यते ।

हिन्दी—मुझ से उत्कर्ष प्राप्त कर उस तारकासुर का मुझ से नाश होना ठीक नहीं है; क्यों कि विषवृक्ष भी लगाकर अपने हाथसे काटना उचित नहीं होता है ।

टिप्पणी--विष-वृक्ष— जीवघातक पेड़, जिसके स्पर्श मात्रा से प्राणी मर जाते हैं । ऐसे वृक्ष आज भी अफ्रिका के घने जगलों में पाये जाते हैं—

यस्य स्पर्श-मात्रेण वायु संस्पर्शनेन च । म्रियन्ते जन्तवः सर्वे विषवृक्षः स कीर्तितः ॥ ५५ ॥

वृत्तं तेनेदमेव प्राङ् मया चाऽस्मै प्रतिश्रुतम् ।
वरेण शमितं लोकानलं दग्धुं हि तत्तपः ॥ ५६ ॥

अन्वयः—प्राक् तेन इदं वृत्तम् एव, मया अस्मै प्रतिश्रुतम् । हि लोकान् दग्धुम् अलम् तत् तपः वरेण शमितम् ।

व्याख्या—वृत्तमिति । प्राक्=पूर्वकालम् । तेन=तारकराक्षसेन । इदम्=एतद् । वृत्तम्=समाचारं प्रार्थितं वा । एव । मया=ब्रह्मणा । अस्मै=एतस्मै तारकासुराय । प्रतिश्रुतं=प्रतिज्ञातम् । हि=यतः । लोकान्=भुवनानि । दग्धुम्=भस्मीकर्तुम् । अलम्=समर्थम् । तत् तपः—तस्य तारकासुरस्य तपः=तपश्चरणम् । वरेण=वरप्रदानेन । शमितम्=शान्तिं प्रापितम् ।

सरलार्थः—पूर्वं तारकासुरेण मत्तः अवध्यत्वं प्रार्थितम्, मया च तस्मै तत् प्रतिज्ञातम् यतस्तस्य तपः अवध्यवरनिषेधे सति लोकान् भस्मी कर्तुं समर्थमासीत् तत्तु वरदाने नैव शान्तिं नीतम् । काव्यलिङ्गमलङ्कारः । अनुष्टुब्वृत्तम् ।

हिन्दी—पूर्व तारकासुर ने यह अवध्यत्व ही मुझ से माँगा और मैंने उसे अवध्य होने का वरदान दे दिया । यदि ऐसा न करता तो उसका तप लोकों

Sri Vidyabharati Book Centre, Shimla

CC-O. In Public Domain. Digitized by eGangotri

को भस्म कर डालता। अवध्य होने का वरदान देकर ही मैंने उसके तप को शान्त किया ॥५६॥

संयुगे सांयुगीनं तमुद्यतं प्रहरेत कः।
अंशादृते निषिक्तस्य नीललोहितरेतसः ॥ ५७ ॥

अन्वयः—संयुगे उद्यतं सांयुगीनं तं निषक्तस्य नीललोहितरेतसः अंशात् ऋते कः प्रहरेत।

व्याख्या—संयुगे इति। सयुगे=युद्धे। उद्यतं = सन्नद्धम्। सांयुगीनं—संयुगे साधुः सांयुगीनस्तम् सांयुगीनम् = संग्रामे साधुं। तं = दुष्टं तारकासुरम्। निषक्तस्य=सन्तानार्थमाहितस्य। नीललोहितरेतसः—नीलः = नीलवर्णः कण्ठे लोहितः = रक्तवर्णश्च केशेषु यः सः नीललोहितः = शिवः ('कृशानुरेता सर्वज्ञो धूर्जटिर्नीललोहितः' इत्यमरः)। तस्य रेतः=वीर्यम् तस्य, नीललोहितरेतसः। अंशात्=भागात्। ऋते=विना ('शुक्रं तेजो रेतसी च बीजवीर्येन्द्रियाणि च'। इत्यमरः)। कः प्रहरेत=कः अन्यः प्रहारं कुर्यात्।

सरलार्थः—रणक्षेत्रे युद्धाय सन्नद्धस्य तारकासुरस्य वधः क्वचित् स्त्रीयोनौ निक्षिप्तस्य शिवस्य वीर्यांशाद् विना नान्यः कर्त्तुं शक्नुयात्।

हिन्दी—युद्ध क्षेत्र में सदैव लड़ने के लिए तत्पर तारकासुर का संहार भगवान् शिव द्वारा किसी स्त्री में उत्पन्न होने वाले वीर्यांश के सिवाय अन्य कोई नहीं कर सकता है ॥ ५७ ॥

स हि देवः परं ज्योतिस्तमः पारे व्यवस्थितम्।
परिच्छन्नप्रभावर्द्धिर्न मया न च विष्णुना ॥५८॥

अन्वयः—हि सः देवः तमः पारे व्यवस्थितं परं ज्योतिः (अस्ति) अत एव मया विष्णुना च परिच्छिन्नप्रभावर्द्धिः न भवति।

व्याख्या—सः हीति। हि=यतः। स देवः=असौ भागवान् शिवः। तमः-तमोगुणात्परम्। व्यवस्थितम् = प्रतिष्ठितम्। परम् = देशकालाद्यनवच्छिन्नं। पारे=महत्। ज्योतिः=तेजः अस्तीति। अत एव मया = विधात्रा। विष्णुना=नारायणेन च ('विष्णुर्नारायणः कृष्णो वैकुण्ठविष्टरश्रवा' इत्यमरः)। परिच्छिन्नप्रभावर्द्धिः-प्रभावस्य ऋद्धिः प्रभावर्द्धिः परिच्छिन्ना प्रभावर्द्धिः यस्य सः=परिच्छिन्नप्रभावर्द्धिः=ज्ञातसामर्थ्यसम्पत्तिः न भवति।

Sri Vidyabharathi Book Centre, Sringeri
सरलार्थः—असौ भगवान् शिवः देशकालाद्यनवच्छिन्नं परमोत्कृष्टं तेजः

CC-O. In Public Domain. Digitized by eGangotri

अस्ति । अतएव मया (ब्रह्मणा) भगवता नारायणेन च ज्ञातसामर्थ्यसम्पत्तिः न भवति ।

हिन्दी--वे भगवान् शिव देशकालादि से अनवच्छिन्न परं तेजः स्वरूप हैं । अतएव मेरे द्वारा तथा भगवान् विष्णु द्वारा उनकी सामर्थ्य सम्पत्ति ज्ञात नहीं हो पाती है ॥५८॥

उमारूपेण ते यूयं संयमस्तिमितं मनः ।
शम्भोर्यतध्वमाक्रष्टुमयस्कान्तेन लोहवत् ॥५९॥

अन्वयः—ते यूयं संयमस्तिमितं शम्भोः मनः उमारूपेण अयस्कान्तेन लोहवत् आक्रष्टुं यतध्वम् ।

व्याख्या --उमारूपेणेति । ते=कार्याभिलाषिणः । यूयम्=सुराः । संयमस्तिमितं-संयमेन स्तिमितं संयमस्तिमितं तत्=समाधिनिश्चलम् । शम्भोः=शिवस्य ('शम्भूरीशः पशुपतिः शिवः शूली महेश्वरः ।' इत्यमरः) । मनः=चेतः ('चित्त तु चेतो हृदयं स्वान्तं हृन्मानसं मनः ।' इत्यमरः) । उमारूपेण—उमायाः=पार्वत्या रूपेण=स्वरूपेण ('उमा कात्यायनी गौरी काली हैमवतीश्वरी' इत्यमरः) । अयस्कान्तेन=लौहकान्तेन चुम्बकमणिना । लोहवत्=अयोधातुसमम् । आक्रष्टुम्=आहर्तुम् । यतध्वम्=प्रयत्नं कुरुत । अत्रोपमालङ्कारः ।

सरलार्थः—अतः भो देवाः । यूयं सर्वे निश्चलसमाधिं शिवस्य चेतः उमासौन्दर्येण चुम्बकमणिना अयोधातुवद् आहर्तुं प्रयत्नं कुरुत ।

हिन्दी –(हे देवताओं !) तुम सब समाधिनिश्चल शिवजी के मन को पार्वतीजी के सौन्दर्य से लौहकान्त मणि (चुम्बक) से जैसे लोहा खींच लिया जाता है उसी प्रकार आकृष्ट करने का प्रयत्न करो ॥५९॥

उभे एव क्षमे वोढुमुभयोर्बीजमाहितम् ।
सा वा शम्भोस्तदीया वा मूर्तिर्जलमयी मम ॥६०॥

अन्वयः--उभयोः शम्भोः मम वा अहितं बीजं वोढुं, क्रमेण शम्भोः सा वा मम च तदीया जलमयी मूर्तिः वा उभे एव क्षमे ।

व्याख्या--उभे एवेति । उभयोः=द्वयोः । शम्भोः=शङ्करस्य । मम=ब्रह्मणः वा । आहितम्=निहितम् । बीजम्=वीर्यम् (शुक्रं तेजोरेतसी च बीजंवीर्येन्द्रियाणि च' इत्यमरः) । वोढुम्=धारयितुम् । क्रमेण=क्रमानुसारं । शम्भोः=शिवस्य । सा=पार्वती । वा=अथवा । मम=ब्रह्मणः च । तदीया=तत्सम्बन्धिनी । जलमयी=वारिमयी । मूर्तिः=काया । वा=च । उभे=द्वे एव । क्षमे=समर्थे इति ।

CC-O. Jangamwadi Math Collection. Digitized by eGangotri
Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सरलार्थः—आवाभ्यां ब्रह्मशिवभ्यामुभाभ्यां निहितंवीर्यं सा पार्वती मे च तदीया जलमयीमूर्तिः इति द्वे एव स्त्रियौ समर्थे स्तः नान्याः काश्चन स्त्रियः ।

हिन्दी—मुझ ब्रह्मा तथा शिव दोनों के द्वारा निहितवीर्य केवल मेरी वह जलमयी मूर्ति तथा पार्वती दो ही धारण करने में समर्थ हैं अन्य कोई स्त्री नहीं ॥६०॥

तस्यात्मा शितिकण्ठस्य सैनापत्यमुपेत्य वः ।
मोक्ष्यते सुरवन्दीनां वेणीवीर्यविभूतिभिः ॥६१॥

अन्वयः—तस्य शितिकण्ठस्य आत्मा वः सैनापत्यम् उपेत्य वीर्यविभूतिभिः सुरवन्दीनां वेणीः मोक्ष्यते ।

व्याख्या—तस्येति । तस्य = तथा विधस्य लोकप्रसिद्धस्य । शितिकण्ठस्य = शितिः कण्ठे यस्य सः, तस्य=श्रीकण्ठस्य शिवस्य ('उग्रः कपर्दी श्रीकण्ठः शितिकण्ठः कपालभृत्' इत्यमरः) । आत्मा=पुत्रः ('आत्मा वै पुत्रनामासि सजीव शरदां शतम्' इति श्रुतिकथनात्) । वः=युष्माकम् । सैनापत्यम्=चमूपतित्वम् । उपेत्य = संगत्य । वीर्यविभूतिभिः—वीर्यस्य=पराक्रमस्य विभूतिभिः=ऐश्वर्यैः । सुरवन्दीनां—सुराणां=देवानां वन्द्याः = पूज्याः, तासाम् वेणीः=संयतकचान् । मोक्ष्यते = विस्रंसयिष्यति । अत्र पर्यायोक्तमलङ्कारः ।

सरलार्थः—लोक-पुराण-प्रसिद्धस्य तस्य नीलकण्ठस्य पुत्रः युष्माकं सेनापतिः संभूय निजैः प्रबलपराक्रमैस्तारकासुरेण बलाद् बन्दीकृतानां वेणीः विमुक्ताः करिष्यति ।

हिन्दी—लोक एवं पुराण प्रसिद्ध नील कण्ठ के पुत्र तुम्हारे सेनापति बनकर अपने प्रबल पराक्रम से तारकासुर द्वारा बन्दी बनाई गई देवाङ्गनाओं की वेणियाँ (चोटियाँ) मुक्त करेंगे ॥ ६२ ॥

इति व्याहृत्य विबुधान्विश्वयोनिस्तिरोदधे ।
मनस्याहितकर्तव्यास्तेऽपि देवा दिवं ययुः ॥६२॥

अन्वयः—विश्वयोनिः विबुधान् इति व्याहृत्य तिरोदधे । ते देवाः अपि मनसि आहितकर्तव्याः सन्तः दिवं ययुः ।

व्याख्या—इति व्याहृत्येति । विश्वयोनिः विश्वस्य = जगतः योनिः= हेतुः, ब्रह्मा ('योनिः स्त्रीणां भगस्थाने कारणे तन्त्रिके पणे ।' इति वैजयन्ती) । विबुधान्=सुरान् ('त्रिदशाः विबुधाः सुराः' इत्यमरः) । इति=एवम् । व्याहृत्य= उक्त्वा । तिरोदधे=अन्तर्हितो बभूव । ते = देवाः । देवाः = सुराः अपि

Sri Vidyadhiraja Book Centre, Tirupati

CC-O. In Public Domain. Digitized by eGangotri

('अमराः निर्जराः देवास्त्रिदशाः त्रिदिवौकसः सुराः' इत्यमरः)। मनसि=चेतसि। आहितकर्त्तव्याः=अहितं कर्तव्यं यैस्ते=धृतकृत्याः सन्तः दिवम्=स्वर्गम्। ययुः=अगच्छन् ('द्यौर्दिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपम्' इत्यमरः)।

सरलार्थः—जगत्स्रष्टा विधाता एवं देवान् अभिधाय तिरोहितो बभूव। ते देवाः अपि चेतसि धृतकर्त्तव्याः सन्तः स्वर्गलोकं जग्मुः।

हिन्दी—जगन्निर्माता ब्रह्मा जी देवताओं से इस प्रकार कह कर अन्तर्ध्यान हो गये। वे देवता भी अपने मन में कर्त्तव्य निश्चित कर स्वर्ग लोक को चले गये॥ ६२॥

तत्र निश्चित्य कन्दर्पमगमत्पाकशासनः।
मनसा कार्यसंसिद्धौ त्वराद्विगुणरंहसा॥६३॥

अन्वयः—पाकशासनः तत्र निश्चित्य कार्यसंसिद्धौ त्वराद् त्रिगुणरंहसा मनसा कन्दर्पम् अगमत्।

व्याख्या—तत्रेति। पाकशासनः=इन्द्रः ('इन्द्रो मरुत्वान् मघवा विडौजा पाकशासनः' इत्यमरः)। तत्र=तद्विषये। निश्चित्य=निश्चयं कृत्वा। कार्यसंसिद्धौ—कार्यस्य=शिवगौरीसमागमरूपस्य कृत्यस्य संसिद्धौ=फलतायाम्। त्वराद्विगुणरंहसा=औत्सुक्यादतिवेगेन। मनसा चेतसा ('चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः' इत्यमरः)। कन्दर्पम्=कामदेवम् ('कन्दर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः' इत्यमरः)। अगमत्=अगच्छत्।

सरलार्थः—इन्द्रस्तद्विषये निश्चयं कृत्वा कार्यसफलतायामौत्सुक्यादतिवेगेन चेतसा कामदेवमगच्छत्।

हिन्दी—इन्द्रदेव इस सम्बन्ध में निश्चयकर शिवपार्वती—समागम रूप कार्य सम्पादन हेतु उत्सुकतावश अतितीव्रता से मन से कामदेव का स्मरण किया॥ ६३॥

अथ स ललितयोषिद्भ्रूलताचारुभृङ्गं
रतिवलयपदाङ्कं चापमासज्य कण्ठे।
सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः
शतमखमुपतस्थे प्राञ्जलिः पुष्पधन्वा॥६४॥

अन्वयः—अथ सः पुष्पधन्वा ललितयोषिद्भ्रूलता चारुभृङ्गं चापं रतिवलयपदाङ्कं कण्ठे आसज्य सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः प्राञ्जलिः सन् शतमखम् उपतस्थे।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

व्याख्या—अथेति। अथ=अनन्तरम्। सः=असौ स्मृतः। पुष्पधन्वा-पुष्पंधनुर्यस्य सः=मदनः ('पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः' इत्यमरः)। ललितयोषिद्भ्रूलताचारुभृङ्गम्—भ्रुवौ एव लते भ्रूलते, ललितयोषितः=मनोरमस्त्रियाः भ्रूलते, ते इव चारुणी=शोभने भृङ्गे=कोटी यस्य तत्=मनोहरस्त्रीभ्रूलताशोभिभृङ्गम् ('स्त्रीयोषिदबला योषा नारीसीमन्तिनी वधूः'। 'वल्ली तु व्रततिर्लता'। 'सुन्दरं रुचिरं चारु सुषमं साधु शोभनम्' इति सर्वत्रामरः)। चापम्=धनुः ('धनुश्चापौ धन्वशरासनकोदण्डकार्मुकम्' इत्यमरः)। रतिवलयपदाङ्के—रतिवलयस्य=कामपत्न्याः कङ्कणस्य पदाङ्कम्=स्थानचिह्नम्, तस्मिन् कण्ठे=गलदेशे। आसज्य=आवृत्य, आरोप्य वा। सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः-सहचरश्चासौ मधुः=सहचरमधुः सहृद् वसन्तः, तस्य हस्ते=करे न्यस्तं=धृतं चूताङ्कुरमेवास्त्रं यस्य सः=सुहृद् वसन्तकरधृताम्रमञ्जर्यायुधः ('मधु क्षौद्रे जले क्षीरे मद्ये पुष्परसे मधुः। दैत्ये चैत्रे वसन्ते च जीवशोके मधुद्रुमे॥' इति विश्वः। 'आम्रश्चूतो रसालोऽसौ इत्यमरः)। प्राञ्जलिः सन्=कृताञ्जलिः सन्। शतमखम्-शतं=शतसंख्यकाः मखाः=यज्ञाः यस्य सः, तम्=इन्द्रदेवम् ('यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः' इत्यमरः)। उपतस्थे=उपस्थितवान्। अत्र स्वभावोक्त्यलङ्कारः। मालिनीवृत्तम्। तद्यथा—ननमयययुतेयं मालिनी भोगिलोकैरिति लक्षणात्।

सरलार्थः—इन्द्रस्य स्मरणान्तरमेव कामदेवः मनोरमस्त्रीभ्रूलताकोमलाग्रं निजं धनुः रतिकङ्कणस्थानचिह्ने कण्ठदेशे आरोप्य मित्रवसन्तहस्तनिक्षिप्ताम्रमञ्जर्यायुधः कृताञ्जलिः सन् देवेन्द्रमुपस्थितवान्।

हिन्दी—इन्द्रदेव के स्मरण करते ही सुन्दरी स्त्री की भ्रूलता के समान कोमल कोटिवाले अपने धनुष को अपनी प्रिया रति के कङ्कणों के स्थान चिह्न वाले कण्ठ में लटकाकर मित्र वसन्त के हाथ में आम्रमञ्जरी रूपी आयुध को लिये हुये मदन हाथ जोड़कर देवराज इन्द्र के सम्मुख खड़ा हो गया।

इति 'सुधा'-संस्कृत-हिन्दीव्याख्यया संवलितकुमारसम्भवे
द्वितीयः सर्गः समाप्तः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

कृष्णदास संस्कृत सीरीज ६७
CC-O. In Public Domain. Digitized by eGangotri

कुमारसम्भवम्

सान्वय-'सुधा' संस्कृत-हिन्दीव्याख्योपेतम्

व्याख्याकार:

पं० परमेश्वरदीन पाण्डेय:

कृष्णदास अकादमी, वाराणसी
Sri Vidyabharathi Book Centre, Sringeri